यजुर्वेद सामवेद-संस्कारभाष्यकर्त्रा वेदान्तसूत्रेषु वैदिकभाष्य-निर्मात्रा भगवद्गीतासु भगवद्भाष्यरचयित्रा काशीपण्डित-सभया "पण्डितराजे" त्युपाधिविभूषितेन स्वामि श्रीभगवदाचार्ययतिराजेन विरचितेन

छान्दोग्योपनिषत्संस्कारभाष्येण

संवलिता

छान्दोग्योपनिषत्

आचार्यपरमानन्दपदद्वन्द्वमुपास्महे । यत्कृपालेशतोपि स्यादुद्धारो नः क्षणादपि ॥ १ ॥
अरण्यं कण्टकाकीर्णं निर्भीकः प्रविशाम्यहम् । तत्र श्रीमद्गुरोः पादपङ्कजालम्बनं महत् ॥ २ ॥
व्याख्यातुमुत्सहे भव्या भव्यैरुपनिषद्गवीः । भावैः शब्दैश्च सत्कृत्याः परमार्थप्रकाशिकाः ॥ ३ ॥
मृच्छिलाखण्डयुक्तोपि गोधूम इति कथ्यते । मृच्छिलाखण्डसंयोगवियुक्तो हि स भुज्यते ॥ ४ ॥
अध्यायैरष्टभिर्युक्ता यद्यप्येषास्ति विश्रुता । तथापि मोक्षवाक्यानि व्याख्यातानीह केवलम् ॥ ५ ॥
सज्जना जनयिष्यन्ति हृदयेत्र महादरम् । दुर्जना जनयिष्यन्ति हृदये विषमुल्बणम् ॥ ६ ॥
तेषामेव विषेण स्याद्धानिस्तेन दुरव्यया । पायाच्छ्रीराम एवात्र तान्सदेत्येव कामये ॥ ७ ॥

अथ द्वितीये प्रपाठके

त्रयोविंशः खण्डः

त्रयो धर्मस्कन्धाः ।

धर्मस्कन्धा धर्मसम्पादनसाधनानि त्रीणि । कानि तानि ?

यज्ञोध्ययनं दानमिति प्रथमः ।

यज्ञशब्देन यजिधात्वर्थाः सर्वे ग्रहीतव्याः । देवः, पूजा, सङ्गतिकरणं, दानं चेति चत्वारोर्थाः ग्राह्याः । अध्ययनं ज्ञानसम्पादकशास्त्राभ्यासः । दानं कस्मैचिदपेक्षितवस्तुप्रदानं पुनरादित्सावर्जितम् । इति प्रथमः स्कन्धः ।

तप एव द्वितीयः ।

तपः शब्देनर्तं तपः सत्यं तप इत्यादयोप्यर्थाः संगृहीतव्याः । इति द्वितीयः स्कन्धः ।

ब्रह्मचार्याचार्यकुलवासी तृतीयः ॥ १ ॥

आचार्यकुले वासो ब्रह्मचर्यपालनं वेदाध्ययनं च तृतीयः स्कन्धः ॥ १ ॥

इति द्वितीये प्रपाठके त्रयोविंशः खण्डः

अथ तृतीये प्रपाठके

एकादशः खण्डः

अहं सत्येन मा विराधिषि ब्रह्मणेति ॥ २ ॥

सत्यमेव ब्रह्म । तेन सत्येन ब्रह्मणाहं मा विराधिषि विरोधं नैव करवाणि । सर्वथा सर्वदा सत्यभाषणेन सत्याचरणेन च ब्रह्म सेवनीयमिति ॥ २ ॥

इति तृतीये प्रपाठके एकादशः खण्डः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ चतुर्दशः खण्डः

सर्वं खल्विदं ब्रह्म। तज्जलानिति शान्त उपासीत॥

इदं ब्रह्मरूपं ब्रह्मशरीररूपं वा दृश्यमानं सर्वं निश्चितं ब्रह्मैव। शान्तः संस्तद्ब्रह्मोपासीत। केन रूपेण तस्योपासनं कर्तव्यमित्याह—तज्जलानिति। जायत इति जम्। लीयत इति लम्। अनिति प्राणिति जीवतीत्यन्। जं च लं च अन् चेति जलान्। तस्य जलान् तज्जलान्। सामान्ये षष्ठी। यज्जायते यच्च नश्यति यच्चानिति तत्सर्वं ब्रह्मैवेति मत्वा शान्तः सन्नुपासीत। उपासिधातोः कर्म ब्रह्मैव। सर्वं ब्रह्म सर्वोत्पादकमपि ब्रह्मेति मत्वोपासीत। ननु विरुद्धमिदमुच्यते जातं जनयितृ च सर्वं ब्रह्मैवेति। नेदं विरुद्धम्। लोकेपि दृश्यते जातः पुत्रो जनकश्च पितोभावेव समानवर्णौ। जातश्च वत्सो जनिका च गौरुभयत्र गोत्वं विश्राम्यति। एवं सृष्टिब्रह्मणोर्जन्यजनकभावे स्वीकृते ब्रह्मत्वमुभयत्र विश्राम्यति। न। अद्यापि विरुद्धमेवैतत्। पितापुत्रयोः समानजातीयत्वं समानवर्णत्वं समानगोत्रत्वं चोभयोर्गुणधर्मसाम्ये प्रतीयते। एवं गोवत्सयोरपि साम्यं निराबाधम्। ब्रह्मणि त्वेवं नास्ति। उत्पादकं ब्रह्म। तच्च चेतनं निरवयवं च। ततो जातं जगच्चाचेतनं सावयवं च। कारणमदृश्यं कार्यं च दृश्यम्। कारणं नित्यमनित्यं च कार्यम्। कथं तर्ह्युभयत्र ब्रह्मबुद्धिः कर्तव्या? सत्यम्। शरीरशरीरिणोरैक्यादैक्यबुद्धिरुभयत्र न विरुद्धयते। विरुद्धयत एव। कथम्? जीवः प्रकृतिश्च शास्त्रीयं शरीरं ब्रह्मणो न तु वास्तविकम्। यद्यस्माज्जायते तत्तस्य शरीरं भवितुमर्हति। मृत्तिकातो जायमानो घटो मृत्तिकाशरीरम्। रक्तमांसमज्जादिभ्यो जायमानं मानवादिशरीर रक्तमांसमज्जाशरीरम्। यदि ब्रह्मणो रक्तमांसमज्जादिमयं जायते शरीरं तर्हि स्यान्नाम तस्य शरीरम्। न तु भवत्येवम्। नास्ति ब्रह्म रक्तमांसमज्जादिसंश्लिष्टम्। किं च यदि ब्रह्मापि तथाभूतं स्यात्तस्यानित्यत्वमेव स्यात्सर्वशास्त्रविरुद्धमपि स्यात्। न जायते म्रियते वा कदाचिदित्यौपनिषदो घोषः। अकायमव्रणमस्नाविरमिति वेदघोषणा। अथापि यदुक्तं तदेव सत्यम्। न हि यस्माद्यज्जातं जायमानं जनिष्यमाणं वा तदेव तस्य शरीरमिति बुद्धिगम्यम्। न हि मृत्तिकायाः शरीरं घटः, कार्यं एव हि सः। भोगायतनं हि शरीरं भवति। यथा देवदत्तशरीरं देवदत्तस्य भोगायतनं भवति। भवतु नाम। अथापि ब्रह्मशरीरं न सिध्यति। न हि ब्रह्मणः किञ्चिद्भोक्तव्यमस्त्यपहतकामस्य। सत्यम्। न हि भोगायतनं शरीरमित्येव शरीरलक्षणम्। किं तर्हि? अन्यदपि लक्षणम्। वाच्यं तत्। उच्यते—येन यदुपयुज्यते स्वेच्छया तदपि तस्य शरीरम्। ब्रह्मणोपयुज्यत एव प्रकृतिः सृष्टिनिर्माणकालतः सा तस्य शरीरम्। भवतु नाम सृष्टिकाले प्रकृतेर्ब्रह्मशरीरत्वम्। प्रलयकाले का कथा? तत्रापि प्रकृतेर्ब्रह्मशरीरत्वमेव। कथम्? इत्थम्। यद्येन धार्यते तदपि तस्य शरीरम्। प्रकृतेर्जीवस्य च धारकत्वं ब्रह्मण्येवावतिष्ठते, नान्यत्र। इदं सर्वं शरीरव्याख्यान-व्यायाम उपनिषदामेव धामनि। अन्यथा भोगायतनं शरीरमित्येव शरीरलक्षणम्। एतल्लक्षणस्वीकारे न भवति वैदिकानां किञ्चिच्छिन्नमित्यलम्॥

अथ खलु क्रतुमयः पुरुषः। यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति।

पुरुष आत्मा क्रतुमयः कर्ममयः। कर्माणि कुर्वाण एवास्ते सः। कर्मान्तरेण न क्षणमपि सन्तिष्ठते सः। अत एव तस्य क्रतुमयत्वम्। अत एव मयटश्चारितार्थ्यम्। एवं चास्मिंल्लोके पुरुष आत्मा यथाक्रतुर्यथा कर्म कुर्वाण आस्ते, इतः प्रेत्य शरीरं सन्त्यज्य तथा भवति। दुष्कर्मात्र चेत्स तत्रापि तथैव भवति। सत्कर्मा योत्र तत्रापि सत्कर्मासौ। अनेन पुनर्जन्म समर्थितं भवति।

स क्रतुं कुर्वीत॥ १॥

स उपासकः क्रतुं कर्म कुर्वीतेति॥

मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा।

उपास्यं स्तौति। स चोपास्यः परमात्मा मनोमयः। विशुद्धमनोमात्रग्राह्यत्वात्तस्य मनोमय इत्युक्तिः। ननु न तत्र मनो गच्छतीत्युपनिषत्संवाद इति चेत्, मलिनमिति विशेषणेन मनो विशेषणीयम्। एवं च विशुद्धेन मनसा तु परमात्मा प्राप्य एवेति। अत एव मनसैवावगन्तव्यमित्यादिरपि स्वरं उपनिषदामेव। अथवात्र मनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानम् । मनोमय इत्यस्य ज्ञानमय इत्यर्थः । प्राचुर्ये मयट् । प्राणशरीरः सर्वेषामेव जीवानां प्राणाः शरीरं यस्य तथाभूतः । सत्स्वेव प्राणेषु शरीरावस्थितिरिति प्राणशरीरोक्तिः । भारूपः प्रकाशस्वरूपः । सत्यसङ्कल्पः । यत्संकल्पते स पूरयत्येव तदिति तस्य सत्यसङ्कल्पत्वम् । आकाशात्मा प्रकाशस्वरूपः । अथवा आकाश इव निर्लेपं स्वरूपं यस्य स आकाशात्मा ॥

सर्वकर्मा ।

सर्वाण्येव सर्जनविसर्जनावनादीनि कर्माणि यस्य । स एव जगत् सृजति विसृजति रक्षतीति ॥

सर्वकामः ।

सर्वान्सत्कर्मणोसत्कर्मण उत्तममध्यमाधमानपि जीवान् कामयत इति सर्वकामः । समदर्शित्वमनेन व्यज्यते । सर्वः काम्यत इति वा ॥

सर्वगन्धः ।

सर्वेषां गन्धानामाश्रयो ब्रह्मैवेत्यनेन सूच्यते ॥

सर्वरसः ।

सर्वे रसा यस्य सः । अथवा सर्वे रस्यः स एवेति ॥

सर्वमिदमभ्यात्तः ।

इदं सर्वं यदुक्तं पूर्वं तत्सोभ्यात्तः स्वीकृतवान् । सर्वेषां पदार्थानां स ग्रहीतेत्यर्थः ॥

अवाकी ।

वचनं वाकः । सोस्यास्तीति वाकी । न वाक्यवाकी । अशरीरत्वान्न तस्य वाक् ।

अनादरः ॥ २ ॥

अकामत्वात्परिपूर्णकामत्वाद्वा न हि कस्मिन्नपि विषये तस्यादरः । अथवा न कस्मिन्नपि विषये तस्यादरोत एव सोनादरो निर्भीकः । दरो भयम् । अधिको दर आदरः । न आदरो यस्य सोनादरः ॥

एष म आत्मान्तर्हृदयेणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा ॥

यो व्रीहेरप्यणीयान्, यवाद्वा श्यामाकाद्वा तत्तण्डुलाद्वाप्यणीयानेष एव मे ममान्तर्हृदये हृदयाभ्यन्तरस्थित आत्मा । श्यामाकतण्डुलस्याणीयस्त्वेन तत्रैवात्मस्वरूपबोधनविश्रमः । एतैर्विशेषणैरात्मनोणुत्वमुक्तं भवति ॥

अथ विभुत्वोक्तिः :—

एष म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्योलोकेभ्यः ॥ ३ ॥

हृदयस्थित आत्मा यथाणीयांस्तथा ज्यायानपि । पृथिव्या अपि ज्यायान् । अन्तरिक्षं हि महत् । ततोपि स ज्यायान् । दिवोपि ज्यायान् । एभ्यो लोकेभ्योपि ज्यायान् । अत्राणुत्वज्यायस्त्वोक्त्यात्मनः स्वरूपं विव्रियते । सोणुरपि । अत एवाणुपरिमाणेष्वपि वस्तुषु तस्य प्रवेशः । सोयं विभुरपि महत्परिमाणोपि । तेनैव विभुष्वपि वस्तुषु तस्य व्यापकत्वम् । ननु यदि सोणुर्न विभुर्यदि विभुर्नाणुः । विरुद्धधर्मात्वादणुत्वविभुत्वयोः कथं सहावस्थानमिति चेत्, सत्यम् । सूक्ष्मत्वमाकारसूचनार्थम् । विभुत्वं च स्वरूपपरिचयार्थमिति ज्ञेयम् ।

एष म आत्मान्तर्हृदय एतद् ब्रह्म ॥ ४ ॥

ममान्तर्हृदये विराजमान एष एवात्मा । स एवैतद्ब्रह्मेत्यप्युच्यते । अत्र जीवब्रह्मणोरभेदः प्रतिपादितः । हृदयान्तस्थो य एवात्मा स वै ब्रह्मेति ।

इति छान्दोग्योपनिषदि छान्दोग्योपनिषत्संस्कारभाष्ये तृतीयप्रपाठके चतुर्दशः खण्डः

●

अथ चतुर्थः प्रपाठकः

प्रथमः खण्डः

संवर्गविद्यारम्भ :—

जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस ।

जानश्रुतिः कश्चनास । कीदृशः ? श्रद्धादेयः श्रद्धापुरस्सरं देयं यस्य । सश्रद्धमेव यत्किञ्चिद्यस्मै कस्मैचित्स ददाति स्म । एवं स बहुदायी प्रचुरदानशीलो बहुपाक्यश्चास । बह्वन्नं तस्य पक्तव्यमासीत् । एतेनावगम्यते तस्य सविधे ये केपि बहवो जना आगच्छन्ति स्मेति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स ह सर्वत्र आवसथान्मापयाञ्चक्रे। सर्वत एव मेन्नमत्स्यन्तीति ॥१॥

स जानश्रुतिः सर्वतो बहुषु स्थानेषु चतसृषु दिक्ष्वावसथान् विश्रामस्थानानि मापयांचक्रे निर्मापयाञ्चकार। किमर्थम् ? सर्वतः सर्वाभ्य एव दिग्भ्य आगता मानवाः श्रान्ता अतिथयो मे ममान्नमत्स्यन्ति भोक्ष्यन्त इति ॥१॥

अथ ह हंसा निशायामतिपेतुः।

अथ कदाचिन्निशायां निशि हंसाः पक्षिविशेषास्तत्रातिपेतुराजग्मुः॥

तद्धैवं हंसो हंसमभ्युवाद।

तत्र कश्चन हंसः कश्चन हंसमभ्युवादाभ्युवाच। किमुवाच ? एवम्—

हो हो हि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततम्। तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीदिति ॥२॥

भल्लाक्षेति सम्बोधनम्। कौतुकद्योतनार्था द्विरुक्तिर्हो हो हीति। जानश्रुतेः पौत्रायणस्य पुत्रस्य पुत्रस्य पुत्रस्यापत्यं पुमांस्तस्य दिवासमं लक्षणया सूर्येण तुल्यं ज्योतिस्तेजः सर्वत्राततं विस्तृतं प्रख्यातमितिभावः। तत्तेजस्त्वा मा प्रसाङ्क्षीस्त्वां मा प्रसक्तं भवतु मा च प्रधाक्षीन्मा च त्वां दहत्विति ॥२॥

तमु ह परः प्रत्युवाच।

स्पष्टम्।

किं प्रत्युवाचेत्याह—

कं वर एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थेति।

उ+अरे=वरे। औपनिषदः सन्धिः। अन्यथा "निपात एकाजनाङ्" इति प्रकृतिभावः स्यात्। किं प्रत्युवाचेत्यनुवदति—सयुग्वा रैक्व एवात्र प्रसिद्धस्त्यागी परमोदारश्च। कः खल्वेष जानश्रुतिर्यं सयुग्वानं रैक्वमिवात्थ प्रशंससीति॥

कश्चिद्द्वितीयो हंसः पृच्छति—

यो नु कथं सयुग्वा रैक्व इति।

यः सयुग्वा रैक्वस्त्वया प्रोक्तः स कथं कीदृश इति।

कश्चनापर आह—

एनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति।

प्रजा लोका यत्किञ्चित्साधु कर्म कुर्वन्ति तत्सर्वमेव तत्तं रैक्वमभिसमेति सर्वतः सम्प्राप्नोति।

यस्तद् वेद यत्स वेद स मयैतदुक्त इति ॥४॥

स रैक्वो यद्वेद यज्ज्ञानं जानाति तद् अन्योपि यः कोपि वेद। नाधिकं ज्ञानं कस्यापि रैक्वज्ञानादित्यर्थः। स मयैतदुक्तः स एव रैक्वो मयेहोक्तः। इति रैक्वपरिचयः ॥४॥

तदु ह जानश्रुतिः पौत्रायण उपशुश्राव।

हंसानां पारस्परिकं तद्वच उक्तं जानश्रुतिरुपशुश्राव समीपस्थः। एते मां निन्दन्ति रैक्वं च प्रशंसन्तीति तेनावगतम्।

स ह संजिहान एव क्षत्तारमुवाच।

स जानश्रुतिः संजिहान एव त्यजन्नेव स्वं स्थानं प्रातःकाले रैक्वं सम्प्राप्य तद्वृत्ताधिजिगमिषया क्षत्तारमुवाच। को नाम क्षत्तेति ? उच्यते—'वैश्याद्ब्राह्मणकन्यायां क्षत्ता नाम प्रजायते। जीविकावृत्तिरेतस्य राजान्तःपुररक्षणम्" इत्युक्तदिशान्तःपुररक्षकः प्रतिलोमजातिविशेषः। यद्युपनिषत्काले क्षतृत्वस्य नासीत्संभवस्तर्हि कश्चन विश्वासपात्रं सेवकः क्षत्तेति॥

किमुवाचेत्याह—

अङ्गारे ह सयुग्वानमिव रक्वमात्थेति। योनु कथं सयुग्वा रैक्व इति ॥५॥

अङ्ग अरे ह इतिनिपातनिचय उपनिषत्परिपाटीसिद्धः। सा च परिपाटी ब्राह्मणेभ्यः प्राप्ता। "सयुग्वानमिव रैक्वमात्थे"ति मया हंसानां वचनप्रतिवचनप्रसङ्गे श्रुतम्। मया विज्ञातुमिष्यते यः सयुग्वा रैक्वः स कीदृश इति॥

स ह क्षत्तान्विष्य नाविदमिति प्रत्येयाय।

अन्विष्येतस्ततः संशोध्य प्रत्येयाय जानश्रुतिं क्षत्ता। उक्तवांश्च नाविदमिति नाज्ञासिषमिति। रैक्वनामानं कंचिन्नाहं लब्धवानिति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तं होवाच यत्रारे ब्रह्मणस्यान्वेषणा तदेनमच्छेति ॥७॥

जानश्रुतिस्तमुवाच। यत्र ब्राह्मणस्य ब्रह्मविदोन्वेषणा युक्ता तत्रैनं रैक्वमच्छं प्राप्तुं गच्छेति। रैक्वो ब्रह्मवेत्तृतया कुत्रापि निभृते स्थाने वासं कुर्वाणो भवेदतस्तत्र गत्वा तं परिशोधयेति ॥

सोधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश।

स क्षत्ता पुनर्गतस्तमन्वेष्टुम्। तदा शकटस्याधस्तात्पामानं रोगविशेषं दद्रुं वा कषमाणं कण्डूयमानं तं दृष्ट्वोपसमीप उपविवेशोपाविशत्।

तं हाभ्युवाद त्वं नु भगवः सयुग्वा रैक्वः इति ?

क्षत्ता तत्र गत्वा तमभ्युवाच—भगवँस्त्वं नु सयुग्वा रैक्व इति।

अहं ह्यरा ३ इति ह प्रतिजज्ञे।

अरे अहमेव रैक्व इति स प्रतिजज्ञे प्रतिज्ञातवान्प्रत्युक्तवानिति।

स ह क्षत्ताविदमिति प्रत्येयाय ॥ ८ ॥

स ह क्षत्ता रैक्वमविदमिति सन्तुष्टः प्रत्येयाय जानश्रुतिं प्रत्याजगाम ॥ ८ ॥

इति प्रथमः खण्डः

●

अथ द्वितीयः खण्डः

तदु ह जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे।

तत् उ ह प्रत्यागतेन क्षत्त्रा रैक्ववृत्तं न्यवेदि। एतावानर्थो हेत्यव्ययमाहात्म्येन लब्धः। ततः परं जानश्रुतिर्गवां षट्शतानि निष्कं कण्ठहारम् अश्वतरीयुक्तं रथं तदादाय प्रतिचक्रमे रैक्वं प्रति जगाम।

तं हाभ्युवाद ॥ १ ॥ रैक्वेमानि षट् शतानि गवामयं निष्कोयमश्वतरीरथो नु म एतां भगवो देवतां शाधि यां देवतामुपास्स इति ॥ २ ॥

इमानि मयानीतानि वस्तूनि गृहीत्वा मह्यं तां देवतां शाधि सम्यगुपदिश यां त्वमुपास्स इति जानश्रुती रैक्वं प्रार्थयाञ्चक्रे।

तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति।

परो रैक्वस्तं प्रत्युवाच—अह ह अरे शूद्र त्वा त्वां तुभ्यमित्यर्थः। उपदिशामीति काकुः। त्वामुपदिशामि ? नवेतिभावः। गोभिः सहेदं सर्वं निष्कादिकं तवैवास्तु न तेन मम प्रयोजनमिति। "गुरूणां सेवया विद्या पुष्कलेन धनेन वा। अथवा विद्यया विद्या चतुर्थं नैव कारणम्।" इति प्राचामुपदेशदिशमाश्रित्य जानुश्रुतिर्गोनिष्कादिकमादाय विद्याग्रहणाय तत्र जगाम। अल्पमेव वित्तं प्रदाय मदीयां विद्यां जिघृक्षत्यसाविति कुपितो रैक्वस्तस्यानादरं कर्तुंकाम उवाच अह ह अरे शूद्र इत्यादीनपशब्दान्। इदं सर्वं तवैवास्तु नास्ति मे प्रयोजनमल्पेन धनेनेति कोपवचनम् ॥

तदु ह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे ॥३॥

रैक्वेण प्रत्याख्यातो जानश्रुतिः पुनरपि तानि सर्वाणि वस्तूनि गाश्चाधिका नवीनवस्तुत्वेन स्वकीयां दुहितरं चादाय तदा प्रतिचक्रमे ॥३॥

तं हाभ्युवाद रैक्वेदं सहस्रं गवामयं निष्कोयमश्वतरीरथ इयं जायायं ग्रामो यस्मिन्नास्से न्वेव मा भगवः शाधीति ॥ ४ ॥

तं ह अभ्युवाद समादरेणोवाच जानश्रुती रैक्वं गवामिदं सहस्रं निष्कोयमयमश्वतरीरथ इयं जायायं दानपत्रे निर्दिष्टो ग्रामश्च यस्मिंस्त्वमास्से तव प्रसादार्थमानीताः। भगवो भगवन्मा मामनुशाध्येवेति अथवा अनु एतद्वस्तुजातमनुलक्ष्य भगवन्मां शाध्येवेति ॥ ५ ॥

तस्या ह मुखमुपोद्गृह्णन्नुवाच।

तस्या राजकन्याया मुखमुपोद्गृह्णन् स्वीकुर्वन् रैक्व उवाच। राजदुहितुर्मुखेन शोभनेनैव भाव्यमिति मुखं दृष्ट्वा प्रीतः सन् कामातुरो वा भवन्नुवाच।

आजहारेमाः शूद्रानेनैव मुखे नालापयिष्यथा इति ॥

हे शूद्र मूर्खेमा गा रथादिकं चाजहाराहृतवानसि। इदं तु सत्यम्। परमनेन राजदुहितुर्मुखेनैवालापयिष्यथा माम्। मदीयां विद्यामधिगन्तुं त्वं मामनया कन्ययैव वादयिष्यसि। कन्यां हेतूकृत्यैव त्वामहं मदीयां विद्यामुपदेक्ष्यामीत्याशयः। अत्र किञ्चिद्वक्तव्यम्। अनार्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवायं रैक्व आसीत्। अनार्य एव च जानश्रुतिः। न हि कश्चिद्ब्रह्मवेत्ता वर्षिः कन्याजिघृक्षया भोगलिप्सया च तत्त्वज्ञानमुपदेष्टुं सज्जो भवेत्। अनेनैव मुखेनेत्युक्त्या स कामुक आसीदिति स्पष्टं व्यज्यते। विद्याजिघृक्षुर्हि परीक्षितव्योऽस्त्येवायमधिकारी विद्याया न वेति। रैक्वेण नाधिकारी परीक्षितः। कन्यैव सर्वस्वमिति मत्वा स स्वकर्तव्यं विसस्मार। राजकन्येति तत्सौन्दर्ये न सन्देहः। तस्याः प्रफुल्लं मुखं वीक्ष्य कामातुरः स स्वविज्ञातां विद्यां राज्ञे दातुं सन्नद्धोऽभवत्। जानश्रुतिरप्यनार्य एव। अतः स्वकीयां कन्यामादाय तामनापृच्छ्यैव तस्मा अदात्। सर्वथायं क्रमोऽनार्य एवेति वयं विद्मः।

इति द्वितीयः खण्डः

●

अथ तृतीयः खण्डः

तानि सर्वाणि वस्तूनि कन्यां च तां गृहीत्वा किमुपदिदेशासावित्यपि द्रष्टव्यम् :—

वायुर्वाव संवर्गः ॥१॥ प्राणो वाव संवर्गः ॥२॥

वृजी वर्जने। संवृक्ते शरीरमिति संवर्गः। शरीरं त्यक्त्वा कः प्रयातीति प्रश्न उन्नेयः। वायुः प्रयातीत्युत्तरम्। स च वायुः प्राणरूप इति स्पष्टीकरणम्। एषा रैक्वविद्या। एतामेव ग्रहीतु मेष महान् प्रयत्नः। नेयमध्यात्मविद्या। नेयमुपनिषत्। प्रसिद्धत्वात्तु संगृहीतं मयैतत्प्रकरणम्। अवश्यमेव जानश्रुतिः शूद्र एवासीत्। अत एव द्वितीयं वारमपि प्रसन्नः सन्नपि रैक्वस्तं शूद्र इत्येव व्याजहार। शुचा शूद्रत्वमित्युवितरप्यनार्या। न हि दशरथोऽयोध्यापती रामवियोगशुचा शूद्र इति वसिष्ठेन व्याहृतम्। सीतावियोगेन लक्ष्मणमूर्छासंयोगेन च शोचन्तमपि रामं वा लक्ष्मणं वा सीतां वा शूद्रशब्देन वाल्मीकिर्न कुत्रापि व्याहृतवान्। रैक्वोऽपि कश्चन मूर्ख एवासीत्। न स किञ्चिज्जानाति स्म। पक्षिणां संवादेन रैक्वमुपासीनो राजा तु परममूर्खः। अवश्यं नात्र किञ्चित्तत्त्वं ब्रह्मजिज्ञासुना ग्रहीतव्यमिति।

इति तृतीयः खण्डः

●

अथ चतुर्थः खण्डः

अथ षोडशकलब्रह्मविद्योपदिश्यते—

सत्यकामो ह जाबालो जबालां मातरमामन्त्रयांचक्रे। ब्रह्मचर्यं भवति विवत्स्यामि। किंगोत्रो न्वहमस्मीति॥ १॥

जबालापुत्रो जाबालो मातरं स्वीयां पृष्टवान् भवति किंगोत्रोऽहमस्मीति। किंनिमित्तकोऽयं प्रश्नस्त्वया क्रियत इत्याह ब्रह्मचर्यं विवत्स्यामीति। ब्रह्मचर्यपूर्वकमाचार्यकुलं गत्वा वेदानध्येष्य इतियावत्॥ १॥

सा हैनमुवाच नाहमेतद्वेद तात यद्गोत्रस्त्वमसि। बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे। साहमेतन्न वेद यद्गोत्रस्त्वमसि। जबाला तु नामाहमस्मि। सत्यकामो नाम त्वमसि। सत्यकाम एव जाबालो ब्रुवीथा इति।

सा जबाला पुत्रमेनमुवाच तात त्वं यद्गोत्रोऽसि तस्य गोत्रस्य नाम नाहं वेद। कुतः? अहं परिचारिणी परितश्चारिण्यासम्। अतोऽहं बहु बहुषु गृहेषु जनेषु वा चरन्ती यौवने युवावस्थायां त्वामलभे लब्धवती। साहं तव गोत्रस्य नाम न जानामीति। मम नाम तु जबाला। तव नाम सत्यकामः। अतोऽहं सत्यकामो जाबालोऽस्मीति ब्रुवीथा आचार्यचरणान्समुपेत्येति। अत्र किंचिद्विवेचनीयम्। किंगोत्रोऽहमस्मीत्येव सत्यकामस्य प्रश्नः। जबालात्मनः पत्युर्नाम न जानाति। अतः कस्तस्याः पतिरिति न ब्रूते। सा मृतपतिकापतिका वासीदिति सुस्पष्टम्। यदि तस्याः पतिः स्यात्कश्चित्सात्मनः पुत्रं पितुः समीपमेव प्रेषयेत्तत्प्रश्नोत्तरलाभार्थम्। सा न तथाकरोत्। सा स्वयमुत्तरयति किंगोत्रस्त्वमिति नाहं जान इति। पितुर्नामाप्यज्ञातम्। वर्णोऽप्यज्ञातः। गोत्रमप्यज्ञातमेव। स्वपुत्रगोत्राज्ञाने हेतुमाह यौवनावस्थायामासं परिचारिणीति। यदि स ब्राह्मणः स्यात्क्षत्रियो वा स्याद्वैश्यो वा स्यादवश्यं यज्ञोपवीतकाले वर्णगोत्रादेर्निर्णयः स्यादेव। अतस्तस्य वर्णज्ञानमपि नासीद्गोत्रज्ञानमपि नासीत्। इदानीं जबालां स गोत्रमेव पृच्छति न वर्णम्। तत्र स्यादेव कश्चन हेतुः। ब्राह्मणक्षत्रियवैश्यानामेव ब्रह्मचर्यं गुरुकुलवासश्चेति प्रतीयते। गोत्रस्य तत्र न प्रयोजनम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथं तर्हि गोत्रजिज्ञासा ? यदि गोत्रशब्देन वर्णस्यैव ग्रहणमिष्टं तर्हि तस्य स्ववर्णज्ञानमपि नासीदिति-विस्पष्टम् । जबाला च स्ववर्णमपि नाजानात्स्वगोत्रमपि नाजानात् । इदं तु कथं सम्पन्नमिति जनयत्येव कुतूहलम् । वस्तुतस्तु संभाव्यते स्यान्नाम जबाला ब्राह्मणपुत्रीति । परं परिचरणकर्मणा सा लब्धवती पुत्ररत्नम् । परिचरणकर्मणेत्यस्य परिचरणं कुर्वत्यास्तस्याः पुत्रोत्पत्तिः । यदि तस्याः कश्चन नियतः पतिः स्वाज्जीवन्वा मृतो वा तन्नामग्रहणमवश्यं सा कुर्यात् । न च सा तथा करोति । ततोनुमीयतेविवाहितैवासीत्सा तस्यामेव दशायां यतः कुतोपि सत्यकामं जनयामास । अत एव साशक्ता सत्यकामजनकनिर्देशे । अत एव च स्वनाम्नैव तं प्रख्यापयति जाबाल इति । सत्यकामस्तु जारज एवेति । जबालाविषये किञ्चिदन्यदपि विचारणीयम् । सा कथयति यौवने त्वामलभ इति । यौवनं तु बहुकालव्यापी । सा तु नासीदधिकवया । यतोद्यावधि सत्यकामो नासीदुपनीतः । अत एवाग्रे कथयिष्यति गौतमः समिधं सोम्याहरोप त्वा नेष्य इति । एतेन बालकाल एव तस्य प्रतीयते । कथं तर्हि यौवने त्वामलभ इत्युक्तिः संगतार्था भवेत् । किं च कथं न सा सत्यकामस्य पितुर्नाम गृह्णाति । कथं न सत्यकामजनकनाम्ना तं प्रख्यापयति कथं च स्वनाम्नैव तत्प्रख्यापनमिति । अतोवश्यमत्र किञ्चिद्गोपनीयं किंचिद् गूहनीयं चासीदेवेत्यलं बहुना श्रमेण ॥ २ ॥

स ह हारिद्रुमतं गौतममेत्योवाच—

स सत्यकामो हरिद्रुमतोपत्यं हारिद्रुमतं गौतममेत्य प्राप्योवाच प्रार्थयामास—

ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति ।

भगवति त्वयि तव सन्निधाविति यावत् । अहं ब्रह्मचर्यं वत्स्यामि ब्रह्मचर्येण वत्स्यामीति भगवन्तमुपेयामुपगच्छेयम् उपागच्छमित्यर्थः ॥ ३ ॥

तं होवाच किंगोत्रो नु सोम्यासीति ।

हे सोम्य त्वं किंगोत्रोसीति गौतमस्तमुवाच पप्रच्छेति ।

स होवाच । नाहमेतद्वेद भो यद्गोत्रोहमस्मि । अपृच्छं मातरम् । सा मा प्रत्यब्रवीद् बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे । साहमेतन्न वेद यद्गोत्रस्त्वमसि । जबाला तु नामाहमस्मि । सत्यकामो नाम त्वमसीति । सोहं सत्यकामो जाबालोस्मि भो इति ॥ ४ ॥

विस्पष्टम् ॥ ४ ॥

तं होवाच नैतदब्राह्मणो विवक्तुमर्हति । समिधं सोम्याहर । उप त्वा नेष्ये । न सत्यादगा इति ॥

गौतमस्तमुवाच—यथा त्वया निःशङ्कं सत्यमुक्तं नैतद् न तथा एतदब्राह्मणो विवक्तुं विस्पष्टमभिधातुमहीति । गौतममते न क्षत्रियादयो विस्पष्टाभिधायिन इति प्रतीयते । तेनादिष्टं सोम्य समिधं होमकाष्ठम् आहर । त्वामुपनेष्ये । यतस्त्वं न सत्यादगा विचलितोभव इति । एतेन प्रतीयते स सत्यवादिन एवोपानेष्ट ।

तमुपनीय कृशानामबलानां चतुःशता गा निराकृत्योवाचेमाः सोम्यानुसंव्रजेति ।

तमुपनीय कृशानामबलानां गवां मध्ये या यानि चतुःशता चत्वारि शतानि गाव आसन्नतिदुर्बला इतिभावः । ता निराकृत्य पृथक्कृत्योवाच सोम्येमा अनुसंव्रजेति अनुगच्छेति ॥

ता अभिप्रस्थापयन्नुवाच नासहस्रेणावर्तेयेति ।

ता गाः प्रस्थापयन्स उवाचाचार्यम्, नासहस्रेण यावदिमाः सहस्रसंख्याका न भवेयुर्नावर्तेय नाहं प्रतिनिवर्त्स्यामि । स च वर्षगणं बहूनि वर्षाणि प्रोवासारण्ये । ताश्च यदा सहस्रं सम्पेदुः सहस्रसंख्याका अभवन् ॥५॥

इति चतुर्थः खण्डः

●

अथ पञ्चमः खण्डः

अथ हैनमृषभोभ्युवाद सत्यकाम ३ इति । भगव इति ह प्रतिशुश्राव । प्राप्ताः सोम्य सहस्रं स्मः । प्रापय न आचार्यकुलम् ॥ १ ॥

अथ हैनमृषभोभ्युवादोवाच । सत्यकाम ३ इति । दूराद्धूतेचेति प्लुतः । दीर्घं च कल्पितम् । भगव इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिशुश्राव प्रत्युत्तरं ददौ सत्यकामः। स पुनरुवाच सोम्य वयं सहस्रं सहस्रसंख्यां प्राप्ताः स्मः। तेन न आचार्यकुलं प्रापयेति ॥ १ ॥

ब्रह्मणश्च ते पादं ब्रवाणीति। ब्रवीतु मे भगवानिति। तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम ॥२॥

ऋषभेणोक्तं ब्रह्मणः पादं ते ब्रवाणीति। सत्यकामेनोक्तं ब्रवीतु भगवानिति। ऋषभ उवाच चतसृष्वेव दिक्षु ब्रह्म विद्यते। दिशामेका कला प्राची एका च प्रतीची एका च दक्षिणैका चोदीचीति। चतसृष्वेव दिक्षु व्यापकत्वाद् ब्रह्मणश्चतुष्कलपादत्वं निरुवाच प्रकाशवत्त्वं च ॥ २ ॥

स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति। प्रकाशवतो हि लोकाञ्जयति एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥ ३ ॥

अत्र यद्वक्तव्यं तदेतत् प्रकरणान्ते वक्ष्यामः ॥३॥

इति पञ्चमः खण्डः

●

अथ षष्ठः खण्डः

अग्निष्टे पादं वक्तेति। स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार। ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥१॥

स ऋषभ जाबालाय ब्रह्मणश्चतुष्कलं पादमुपदिश्योक्तवानग्निरपरं पादं से वक्तेति। श्वोभूतेपरेद्युः स गा अभिप्रस्थापयांचकार। ताः सायङ्काले यत्राभिबभूवुरभितो बभूवुस्तस्थुरित्यर्थः। तत्र गा उपरुध्य समिधमाधायाग्निमुपसमाधायाग्निहोत्रं कृत्वेत्यर्थः। पश्चात् ततः परमग्नेः प्राङ् पुरस्तादुपविवेश ॥१॥

तमग्निरभ्युवाद सत्यकाम ३ इति। भगवइति ह प्रतिशुश्राव ॥ २ ॥

सत्यकाम ३ इत्यग्निना स समबोधि। भगवन्, इति स प्रत्युवाच। किमादिशति भगवानिति स प्रत्युवाचेत्यर्थः ॥ २ ॥

ब्रह्मणः सोम्य ते पादं ब्रवाणीति। ब्रवीतु मे भगवानिति। तस्मै होवाच पृथ्वी कलान्तरिक्षं कला द्यौः कला समुद्रः कला। एष वै सोम्य चतुष्कलः पादो ब्रह्मणोनन्तवान्नाम ॥ ३ ॥

नात्र किञ्चिन्निगूढम् ॥ ३ ॥

स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणोनन्तवानित्युपास्तेनन्तवानस्मिँल्लोके भवति। अनन्तवतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणोनन्तवानित्युपास्ते ॥ ४ ॥

नात्र किंचिदौपनिषदं तत्त्वं निगूढमिति विरम्यते ॥४॥

इति षष्ठः खण्डः

●

अथ सप्तमः खण्डः

हँसस्ते पादं वक्तेति। स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार। ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥

सर्वं चतुरस्रम् ॥१॥

तं हँस उपनिपत्याभ्युवाद सत्यकाम ३ इति। भगव इति ह प्रतिशुश्राव ॥२॥

व्याख्यातम् ॥२॥

ब्रह्मणः सोम्य ते पादं ब्रवाणीति। ब्रवीतु मे भगवानिति। तस्मै होवाचाग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कला। एष वै सोम्य चतुष्कलः पादो ज्योतिष्मान्नाम ॥ ३ ॥

व्याख्यातप्रायम् ॥ ३ ॥

स य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिँल्लोके भवति। ज्योतिष्मतो ह लोकाञ्जयति य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥ ४ ॥

नात्र किञ्चित्तिरोहितम् ॥ ४ ॥

इति सप्तमः खण्डः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ अष्टमः खण्डः

मद्गुष्टे पादं वक्तेति। स ह श्वोभूते गा अभि प्रस्थापयाञ्चकार। ता यत्राभिसायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥

तं मद्गुरुपनिपत्याभ्युवाद सत्यकाम ३ इति। भगव इति ह प्रतिशुश्राव ॥ २ ॥

ब्रह्मणः सोम्य ते पादं ब्रवाणीति। ब्रवीतु मे भगवानिति। तस्मै होवाच प्राणः कला चक्षुः कला श्रोत्रं कला मनः कला। एष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान्नाम ॥ ३ ॥

स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते आयतनवानस्मिँल्लोके भवति आयतनवतो ह लोकाञ्जयति य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ॥ ४ ॥

नात्र किञ्चिन्नूतनम् ॥ ४ ॥

इति अष्टमः खण्डः

●

अथ नवमः खण्डः

प्राप ह आचार्यकुलम्। तमाचार्योऽभ्युवाद सत्यकाम ३ इति। भगव इति ह प्रतिशुश्राव ॥ १ ॥

नात्र किञ्चित्तिरोहितम् ॥ १ ॥

ब्रह्मविदिव सोम्य भासि। को नु त्वानुशशासेति। अन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवाँस्त्वेव मे कामे ब्रूयात् ॥ २ ॥

आचार्य उवाच सोम्य ब्रह्मविदिव भासि। को नु त्वानुशशास कस्त्वामुपदिष्टवान्? मनुष्येभ्योऽन्ये केचनेति स प्रतिजज्ञे प्रतिवचनं ददौ। तु किन्तु भगवानेव मे कामे काम्ये विषये ब्रूयात्। सत्यकामो बहूनि वर्षाणि गाश्चारयित्वापेक्षितसंख्याश्च गवां पूरयित्वाचार्यकुलमाजगाम। आचार्यस्तं ब्रह्मविदिव त्वं भासीत्युक्तवान्। अत्र विचार्यं कथं सत्यकामस्य ब्रह्मवित्त्वमनुमिनोति स्माचार्यः। ऋषभोऽग्निर्हंसोमद्गुरेते चत्वार उपदेष्टारस्तस्य। तेषामुपदेशवचने नास्ति किञ्चिद् ब्रह्मज्ञानम्। तथाप्याचार्यः कथयामास त्वं ब्रह्मविदिव भासीति। पञ्चमखण्डादारभ्य नवमखण्डपर्यन्तमेव यदि ब्रह्मविद्या हन्त सर्वमेव जगद् ब्रह्मविदिति। मन्यामहे जाबालस्यापि नासीन्मनस्तोषस्तेषां विद्याश्रवणेन। अतएव स प्रार्थयाञ्चक्रे भवानेव ममेष्टे विषये किञ्चिदुपदिशतु ॥ २ ॥

किमर्थं त्वमस्मत्तः श्रोतुकामोऽसीत्याह—

श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापतीति ॥ ३ ॥

भगवद्दृशेभ्यो विद्वद्भ्यो मे श्रुतं मया श्रुतमित्यर्थः। किं श्रुतम्? यद् आचार्यादेव विदिता ज्ञाता विद्या साधिष्ठं प्रापतीति साधुतमत्वं प्राप्नोतीति। भवानेव ममाचार्यो नासौ वृषभो नासावग्निर्नासौ हंसो नासौ च मद्गुः। नैतेषां वचनेन मम किञ्चिदवगतम्। भवदतो भवानेव ममाचार्यो भवानेव कामेमे ब्रूयादिति ॥

तस्मै हैतदेवोवाच। अत्र ह न किञ्चन वीयायेति वीयायेति ॥ ३ ॥

आचार्योऽपि तस्मा एतदेवोवाच न किञ्चिदधिकम्। सत्यकामस्तु पूर्वमेवर्षभादीनामुपदेशेनासन्तुष्ट आसीत्। इदानीमाचार्यमुखादपि तदेव सर्वमुपश्रुत्य खिन्नमनस्कोऽब्रवीत्-'अत्र भवत उपदेशेऽपि किञ्चन न वीयाय तैर्यदुक्तं तस्मात्किञ्चिदपि विगतं न भवति। तदेव भवानपि वदति। स्वान्तर्भावमाविष्कर्तुंमौदासीन्यं च प्रकटयितुं द्विराह वीयायेति। नेत्यपि योजनीयम् न वीयायेति न वीयायेति। अत्र बहूनि वर्षाणि यावद्गोचारणमेव फलं न ब्रह्मविज्ञानमिति। अस्मिन् प्रघट्टके जबाला सत्यकामस्यात्मनः पुत्रस्य न गोत्रं जानाति न वा पितरम्। यदि पितरमज्ञास्यत्तस्योल्लेखमकरिष्यत्। नाहं तव पितरमप्राक्षमिति च ब्रूयात्। ऋषिराह त्वं ब्राह्मणोऽसीति कथमृषिणा तस्मिन् ब्राह्मणत्वं व्यवस्थापितम्? जाबालस्य सत्यभाषणमेव तत्र हेतुः। तत्र विचार्यते, अस्ति काचिच्छास्त्रकाराणामाज्ञा यः सत्यं वदेत्स ब्राह्मणत्वं प्राप्नुयादिति। नास्त्येव तादृशी काचिदाज्ञा। तर्हि किमौपनिषदकाल आसीत्काचित्परिपाटी सत्यवादिनं यं कमपि ब्राह्मणं वक्तुमिति। सापि नोपलभ्यते। रामो द्विर्नाभिभाषते इति वदत्यपि रामे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न केनापि ब्राह्मणत्वं प्रतिपादितम्। विश्वामित्रो महत्तपस्तप्त्वैव ब्राह्मणत्वं जगाम न सत्यमभिभाष्य। अन्येपि हरिश्चन्द्रादयो बहवः सत्यवादिनो न ब्राह्मणतां जग्मुः, कथं तर्हि जाबाल एव गुरोः कृपापात्रम्? किंच गुरुस्तु सत्यवादित्वमेव हेतूकृत्य ब्राह्मणत्वं तस्यान्वमिनोत्। हेतुस्तु स व्यभिचार्येव रामादिदृष्टान्तेन समर्थयितुं शक्यते। एवं चात्र ब्राह्मणपदं न ब्राह्मणजातिपरम्। किन्तु ब्रह्म जिज्ञासुर्ब्राह्मणः। अवश्यं त्वं ब्रह्मजिज्ञासुरिति तव हृदये ब्रह्मजिज्ञासा प्राबल्येन जागर्तीति त्वं सत्यभाषणे न समकुचः। एवं जानन्नप्याचार्यस्तं न ब्रह्माबूबुधत्केवलं वा अचारयत् तत एवोपदेशलिप्सुरपि स यद्वा तद्वा वचनं विन्यस्य गुरुणानुपदिष्ट एव॥ ३॥

इति नवमः खण्डः

अथ षष्ठः प्रपाठकः

अथ प्रथमः खण्डः

श्वेतकेतुर्हारुणेय आस।

अरुणपुत्रस्य पुत्रः श्वेतकेतुरास बभूव।

तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यम्।

श्वेतकेतोः पिता तमुवाच ब्रह्मचर्यं वसेति ब्रह्मचर्याश्रमे वसन् वेदादीनधीष्वेति तात्पर्यम्। कुत इदं कर्तव्यमित्याह—

न वै सोम्यास्मत्कुलीनोननूच्य ब्रह्मबन्धुरिव भवतीति॥ १॥

हे सोम्य, अस्मत्कुलीनः कोप्यननूच्य वेदाननधीत्य ब्रह्मबन्धुरिव न भवतीति। वेदविहीनो वैदिकाचारहीनश्च ब्राह्मणो ब्रह्मबन्धुरित्युच्यते॥ १॥

स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय।

स च द्वादशवर्षवयस्कः कमपि गुरुमुपेत्य चतुर्विंशतिवर्षवयस्कः सन् सर्वान्वेदानधीत्य महामना महागर्वगुम्फितोनूचानमानी अनुचानमात्मानं मन्यमानः स्तब्धोन्यानगणयन्नेयाय पितुः समीपं प्राप।

तं ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोसि। उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति॥ २॥

पिता गुरुकुलादागतं पुत्रं वीक्ष्योवाच सोम्य वत्स श्वेतकेतो, इदं दृश्यते यत्त्वं महामना अनूचानमानी स्तब्धोसीति। तर्हि किं तं स्वाचार्यमादेशमादिश्यते वेदैर्यः स आदेशो ब्रह्मेति यावत्। तमादेशमप्राक्षोप्राक्षीर्येनादेशेन ब्रह्मणा ब्रह्मज्ञानेनेति भावः। अश्रुतमपि श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवतीति। अथवादेशो वेदः। आदिश्यत इति। तं वेदमाचार्यमप्राक्षीरध्यैष्ठा इत्यर्थः। येन वेदेन वेदाध्ययनेनेत्यर्थः। अश्रुतं श्रुतं भवतीत्यादि पूर्ववत्। उभयथापि श्रुत्यर्थो व्याख्यातुं शक्यः।

कथं नु भगवः स आदेशो भवतीति॥ ३॥

श्वेतकेतुरुवाच भगवो भगवन् कथं कीदृक्स आदेशो येन ज्ञातेन सर्वमविज्ञातं विज्ञातं भवत्यमतं मतं भवत्यश्रुतं च श्रुतं भवतीति। नैतां विद्यामहमधीतवानित्युत्तरस्याशयः॥ ३॥

पितोत्तरमाह—

यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्।

हे सोम्य यथा मृत्पिण्डेनैकेन विज्ञातेन सर्वं मृन्मयं मृत्पिण्डनिर्मितं विज्ञातं स्यात्, मृत्पिण्डज्ञानेन तत्कार्यीभूतं सर्वं घटशरावादिकं यथा ज्ञातं भवति तथा तेनैकेनाप्यादेशेनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं च विज्ञातं भवतीति। ननु नैतत्समीचीनम्। मृत्पिण्डज्ञानेन मृद्घट एव विज्ञातो भवति न तु कनकघटः पटो वा। एवं तदादेशविज्ञानेन तदेव विज्ञातं स्यान्नतु किञ्चिदन्यदितिप्रश्नस्योत्तरं विवक्षमाणा श्रुतिराह—

वाचारम्भणं विकारो नामधेयम्। मृत्तिकेत्येव सत्यम्॥ ४॥

कार्यकारणयोः शरीरशरीरिणोः प्रकृतिब्रह्मणोरेकत्वमङ्गीकृत्योत्तरमाह—विकारो नामधेयं च वाचारम्भणं वचनमात्रमेवेति मृत्तिकाविकारो घटः कम्बुग्री-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वादिमती व्यक्तिः। घट इति तन्नाम चेत्युभे वाचारम्भणं वचनमात्रमिति। वस्तुतस्तु मृत्तिकेत्येव सत्यम्। कारणं सत्यं कार्यं तु व्यवहारमात्रोपयोगी। एवं च मृत्तिका घटकारणभूता हि सत्यम्। तस्य घटादिविकारो नामधेयं च व्यवहारमात्रोपयोगि। इदमत्रोच्यते। मृत्तिकया घटोपि निर्मीयते दीपोपि। हण्डिकापि निर्मीयते शरावोपि। विकारोपि परिवृत्यते तदधीनं नामापि। मृत्तिका तु यथास्वरूपमेवावतिष्ठते। मुख्यं वस्तु मृत्तिका। घटोपि मृत्तिकाज्ञानेनैवावगम्यतेयं घट इति। मृत्तिका निदर्शनमात्रम्। सुवर्णज्ञानेन सौवर्णः कलशः कंसश्च सुवर्णत्वेनैव गृह्यते। एवं च शरीरशरीरिभूतयोः प्रकृतिब्रह्मणोः कार्यभूतं सर्वं जगत्तज्ज्ञानेनैव विज्ञातं भवति। यत्तु विज्ञातं भवति जातं जायमानं वा घटादिकं तत्तु न स्थायि। न वा स्थास्नु। मृत्तिकेत्येव स्थायिनी। एवं विकारनामधेये न स्थास्नुनी। कारणभूता मृत्तिकैव स्थास्नुः। मृन्मय इति दृष्टान्तमात्रं श्रुतौ ॥ ४ ॥

अन्यदुदाहरति—

यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्। वाचारम्भणं विकारो नामधेयम्। लोहमित्येव सत्यम् ॥ ५ ॥

अथ लोहमणिः सुवर्णपिण्डमिति प्रायेण सर्वे व्याख्यातारः। वयं तु तद्विपरीतं लोहाकर्षकं चुम्बकनाम्ना प्रसिद्धं धातुविशेषं मन्यामहे। अतः परस्यां श्रुतौ कार्ष्णायसमितिदर्शनेनात्र लोहमणिः सुवर्णमेवेति कथनं तु न विद्वद्योग्यम्। लोहमणिरित्यस्य लोहाकर्षको मणिर्लोहमणिरित्येवार्थो योग्यतां धत्ते ॥ ५ ॥

अन्यदप्युदाहरति—

यथा सोम्यैकेन नखनिकृन्तनेन सर्वं काष्णीयसं विज्ञातं स्यात्। वाचारम्भणं विकारो नामधेयम्। कार्ष्णायसमित्येव सत्यम् ॥ ६ ॥

सर्वमत्र स्पष्टम्। अत्र किञ्चिद्विवेचनीयम्। प्रथमायां श्रुतौ मृत्पिण्डेनावगतेन सर्वं मृन्मयं विज्ञातं स्यादित्युक्त्या कारणेन कार्यं परिचेयमित्युक्तम्। द्वितीयस्यामस्यां तृतीयस्यां चापि श्रुतौ तथैव प्रतिपादितम्। अत्र श्रुतौ कारणभूतं ब्रह्म कार्यभूतं च जगत्, अनयोः कार्यकारणभावो निर्दिश्यते। कारणज्ञानेन कार्यज्ञानं स्वत एव भवतीत्युपदेशोत्र।

तत्तु न सम्यक्। मृत्तिकाविज्ञानेनायं घट इति ज्ञानं स्यात्परमयं पट इति ज्ञानं न स्यात्। मार्त्तिकत्वं तु यथा घटे तथैव पटेपि। प्रकृतिज्ञानेन पञ्चतभूतज्ञानेन च न हि सूर्याचन्द्रमसोरपि ज्ञानं भवति। कारणभूतचेतनब्रह्मविज्ञानेन कार्यभूताचेतनघटविज्ञानं सर्वथानुपपन्नम्। न च कार्यकारणाभेदविज्ञानादिदं विज्ञानं सिध्यतीतिवाच्यम्। अभेदविज्ञानं न तात्त्विकं केवलं शास्त्रनिर्वाहाय शास्त्रीयं हि तत्। न च शरीरशरीरिभावादभेदविज्ञानमितिवाच्यम्। शरीरशरीरिभावयोरपि काल्पनिकत्वात्। अन्यथा शरीरदोषा शरीरिणमपि दूषयेयुः। अत एकविज्ञानेन सर्वविज्ञानमनावश्यकमित्येव सर्वविज्ञानस्य तात्पर्यम्। यथायोध्यायां रामजन्मभूमिदर्शनेन सर्वं दृष्टं भवतीत्यस्य नायमर्थः कनकभवनमपि दृष्टं भवतीति किन्तु तद्दर्शनस्य गौणत्वमेव प्रतिपादितं भवति। एवमत्रापि ब्रह्मज्ञानोत्तरं हिमालयदर्शनस्य नावश्यकत्वं न वा गङ्गास्नानस्यावश्यकत्वम्। एवमत्र ब्रह्मज्ञानमेव सम्पाद्यमित्यत्रैवाचार्यभारो न तु जगज्ज्ञानमपि सम्पादनीयमित्यत्र। न च ब्रह्ममृत्तिकयोर्वास्तविकोभेद इति ब्रह्मविज्ञानेन मृत्तिकाविज्ञानमपि न सिध्येत्। किं च घट इति मृत्तिकाकार्यम्। मृत्तिका च तस्योपादानम्। एवं च कार्यज्ञानेनोपादानकारणस्यावगतिस्तु न्याय्या न तु निमित्तकारणस्यापि। न च सूक्ष्मचिदचिद्विशिष्टं ब्रह्मैवोपादानमस्य जगत इतिवाच्यम्। अचिदेव जगत उपादानं नतु चिदपि ब्रह्मापि च। अपृथक्सिद्धिसम्बन्धेन हेतुनैव तथा निर्देशो न परमार्थेन। ब्रह्म कस्याप्युपादानत्वं न भजत इति ॥६॥

न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन् कथं मे नावक्ष्यन्निति भगवाँस्त्वेव मे तद्ब्रवीत्विति ॥

श्वेतकेतुराह नूनं ते भगवन्त एतन्नावेदिषुः। यद् यदि एतदवेदिष्यन् कथं मे नावक्ष्यन्निति। एतावता ते नावेदिषुस्तत्तत्त्वं येन विज्ञातेनान्येषां वस्तूनां विज्ञानं नापेक्षितं स्यादित्युक्तं भवति। अतो भगवानेव मे तद्ब्रवीतूपदिशत्विति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथा सोम्येति होवाच ॥७॥

हे सोम्य तथास्तु ह इत्युवाच श्वेतकेतुपिता। उपदिशाम्येव तत्तत्त्वं तुभ्यमिति तात्पर्यम् ॥७॥

इति प्रथमः खण्डः

अथ द्वितीयः खण्डः

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ॥

हे सोम्याग्रे सृष्टेः प्राक्काल इदमद्वितीयमेकं सदेवासीत्। अत्रेदंशब्देन परं ब्रह्म वेदितव्यम्। प्रसिद्धत्वात्प्रत्यक्षस्यैव प्रदर्शनमिदमिति। अद्वितीयमित्यस्य न तत्तुल्यं किञ्चिदन्यदासीदित्यर्थः। सार्वदिकं सिद्धमद्वितीयत्वम्। अद्वितीयोयं विद्वानित्युक्ते तत्तुल्यान्यविद्वत्सत्ता निषिध्यते न तु यावद्वस्तुसत्ता। एवमत्राद्वितीयपदेन ब्रह्मणोद्वितीयत्वं विलक्षणत्वं वा प्रतिपाद्यते नत्वन्यवस्तुसत्ता निषिध्यते। यद्यन्यद्वस्तु नास्त्येव नासीद्वा तर्ह्यद्वितीयपदमेवापदत्वं भजेत। एकमेवेत्यनेनैवाद्वितीयत्वं सिध्येत् किमर्थमद्वितीयमितिशब्दोपन्यासः। अत एकं सदासीत्तच्चाद्वितीयम्। सच्छब्देन ब्रह्म ग्राह्यम्। अग्रे इत्युक्तम्। कस्मादग्रे? सृष्टेरिति। अत्रैवकारेण किं व्यावर्त्यंत इति विचार्यते। एवकारस्त्रिविधः। क्वचिद्विशेषणसंगतः यथा शङ्खः पाण्डुर एवेति। अत्र शङ्खत्वावच्छेदेन पाण्डुरत्वायोगव्यवच्छेदः सूच्यते। क्वचिद्विशेष्यसंगतः। यथा पार्थ एव धनुर्धर इत्यादौ। अत्र विशेषणे धनुर्धरे पार्थान्ययोगव्यवच्छेदः। क्वचित्क्रियासंगतः। यथा नीलं सरोजं भवत्येवेत्यादौ। अत्रान्वयितावच्छेदकसरोजत्वसामानाधिकरण्येन सरोजनीलभवनकर्तृत्वात्यन्तायोगव्यवच्छेदः। सदेव सोम्येत्यत्र तु एवकारस्य क्रियया सह संयोगात्सद्भवनकर्तृत्वात्यन्तायोगव्यवच्छेदः क्रियते। एवं चाग्रे सदासीदेवेतिवाक्यविन्यासः। सच्छदेन ब्रह्मणो ग्रहणम्। ब्रह्म च चिदचिद्भ्यां विशिष्टवेषेणैव सर्वदावतिष्ठते। एकको देवदत्तआस्त इत्यत्र यथा हस्तपादिन्द्रियसमवायसत्त्वेपि देवदत्त एककत्वं व्यवह्रियते तच्च न दूष्यते तथैव चिदचिच्छरीरसत्त्वेपि ब्रह्मण्येकत्वमेककत्वं वा न विरुध्यते। ब्रह्मणस्त्रिकालाबाधितत्वेनास्त्यासीदित्यादिक्रियासमभिव्याहारस्यायुक्तत्वेपि सृष्टेः पूर्वावस्थां प्रत्याययितुं भूतकालप्रयोगः ॥

उपनिषत्काले प्रचलितस्य नास्तिकमतस्य सिद्धान्तमनुवदति—

तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम् ॥

तत् तत्रैक आहुरिदमसदेवाग्र आसीदिति। न सद्यस्मिस्तदसत्। इदं जगदसदनीश्वरमेवासीत्। जगदासीत्, नासीच्च ब्रह्म किञ्चित्तन्नियामकं चेतनं वा। एतेन जगतो नित्यत्वं ब्रह्मणोसत्त्वं च प्रतिपादितं भवति। एकमेवाद्वितीयमितिपाठोत्रासङ्गत एव। अथवा जगतो विशेषणमेतत्। जगदद्वितीयमेवासीत् न ब्रह्मणो द्वितीयमिति। नामरूपविभागाभावलक्षणमसत्त्वं तु नात्र विवक्षितम्। यद्येष एवार्थोत्र विवक्षितः स्यात्पूर्वस्यां श्रुतावपि तच्छब्दार्थः परिवर्तनीयः स्यात्। स एव तच्छब्दो नञा सहात्रागतः। यदि तत्र सच्छब्देन ब्रह्म गृहीतं भवति, अत्रावश्यं सदभावो ग्रहीतव्यः। एवं च ब्रह्माभाववदेवेदं जगत्पूर्वमासीदित्येवार्थः।

तस्मादसतः सज्जायत ॥१॥

तस्मादसतः सज्जायत सदजायत। अडभाव औपनिषदः।

कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति ॥

पक्षमिमं निरसितुमुद्दालकः स्वपुत्रं श्वेतकेतुं पृच्छति सोम्य कुतः खल्वेतत्स्यादिति? कथमसतः सज्जायेतेति? प्रश्नपूर्वकं काक्वा तत्पक्षं निरसितुमाह—

सत्त्वेव सोम्यैकमग्र आसीदेकमेवाद्वितीयम् ॥

सोम्याग्र इदं सदेवासीत्। परमाणुरूपं सूक्ष्मं जगदेवासीत्। अत्रैवकारप्यर्थकः। एवं च जगदप्यासीत्, एकमेवाद्वितीयम् अत्राप्येवकारोप्यर्थकः। एकमद्वितीयं ब्रह्माप्यासीत्। अनेन कथमसतः सज्जायेतेति नावसरः शङ्कायाः।

सदेवासीदित्युक्तम्। सच्च सूक्ष्मं जगत्। इदानीं स्थूलसृष्टिक्रममाह—

तदैक्षत बहु स्यां प्रजायेयेति। तत्तेजोसृजत।

तदद्वितीयं ब्रह्मैक्षत व्यचारयत्समकल्पयत्। किम्?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बहु स्याम् । कथं बहुभवनम् ? प्रजायेयेति सृष्टिरूपेणाजायेयेति । एवं संकल्प्य तद्ब्रह्म तेजोसृजत ससर्ज ।

तत्तेज ऐक्षत बहु स्यां प्रजायेयेति । तदपोसृजत ।

तद्ब्रह्म तेजः सृष्ट्वा पुनरैक्षत बहु स्यां प्रजायेयेति तत्ततोपोसृजत ससर्ज ।

अपां तेजः कारणम् । कारणगुणपूर्वकत्वं हि कार्यगुणस्य भवति ।

तदेव दर्शयितुमाह—

तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते ॥ ३ ॥

तस्मात्तेजसोपामुत्पत्तेर्हेतोर्यत्र क्वचन कश्चन शोचति स्वेदते स्विन्नो वा भवति पुरुषस्तेजस एव तत्तदाधिजायन्त आपः । शुचा संतापेन शरीरे दाहो जायते दाहाच्च स्वेदः । स्वेदोऽब्रूपः । योग्यकारणाद्योग्यकार्योत्पत्तिरिति ॥ ३ ॥

ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त ।

ता आपः कर्त्र्य ऐक्षन्त व्यचारयन्समकल्पयन्त । किम् ? बह्व्यः स्यामेति । कथम् ? प्रजायेमहीति । इति संकल्प्य ता अन्नमसृजन्तेति । अत्राप एव कर्त्र्यः । एवं तु तत्तेज ऐक्षतेत्यत्रापि तेजः कर्तृपदमिति । परमेवं ब्रह्मणः कर्तृत्वं दुर्घटम् । ननु स्याद्दुर्घटं कर्तृत्वं ब्रह्मणः का हानिः ? अस्त्येव हानिः । तत्तेज ऐक्षत ता आप ऐक्षन्तेत्यादौ तेजसोपां चेक्षणकर्तृत्वं स्यात्तच्च न संगतम् । तेषां जडत्वेन तेषु न स्यादीक्षणकर्तृत्वम् । सत्यम् । तेजआदिशब्दानां तच्छरीरकब्रह्मपरत्वमिति द्रष्टव्यम् । एवं च तेजःशरीरकं ब्रह्मैक्षतेति साधुरर्थः । एवं ब्रह्मशरीरभूता आप ऐक्षन्तेत्यादिः सुगमोर्थः ।

तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवति ।

स्पष्टम् ।

अद्भ्य एव तदध्यन्नाद्यं जायते ॥ ४ ॥

अद्भ्य एव तदन्नाद्यम् अधिजायते । ४ ॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठके द्वितीयः खण्डः

●

अथाष्टमः खण्डः

सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ।

आरुणिरुद्दालकः श्वेतकेतुं पुत्रमुवाच सोम्येमाः सर्वाः प्रजाः ससन्मूला सद् ब्रह्मैव मूलं यासां ताः । सदायतनाः ब्रह्मायतनाः । सत्प्रतिष्ठा ब्रह्मप्रतिष्ठाः । सर्वासां प्रजानां सर्वेषां प्राणिनामायतनं प्रतिष्ठानं च ब्रह्मैवेति ।

म्रियमाणस्य पुरुषस्य वागादीनां लयक्रम उच्यते—

अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते । मनः प्राणे । प्राणस्तेजसि । तेजः परस्यां देवतायाम् ॥६॥

प्रयतो म्रियमाणस्यास्य पुरुषस्य वाक् मनसि सम्पद्यते लीनाति मनः प्राणे लीनाति । प्राणस्तेजसि लीनाति । तेजश्च परस्यां देवतायां लीनं भवति । परा देवता तु आत्मैवेति । अत्र प्रयतः पुषस्येत्युक्तं तद्युक्तमयुक्तं वेति विचारणीयम् । पुरुषस्त्वमरणधर्मेति सर्वशास्त्राणामुपनिषदां चापि डिण्डिमः । कथं तर्हि सोक्तिर्याथार्थ्यं निषेवेत ? सत्यम् । शरीरशरीरिणोरैक्यादियमुक्तिः । वस्तुतस्तु प्रयत इत्यस्य शरीरं परित्यज्य गच्छतः पुरुषस्येति व्याख्यानम् । ननु पुरुषस्य न भवन्ति वाङ्मनःप्राणादयः । कथं तर्हि तस्य तदुक्तिः ? प्राणनावस्थायां शरीरस्वामित्वादद्यापि तथैवोपचारः ॥

स य एषोणिमा ।

परस्यां देवतायामित्यनेन निर्दिष्टो य आत्मा स एषोणिमातिसूक्ष्म इत्यर्थः । अत एवाविज्ञेयः ।

ऐतदात्म्यमिदं सर्वं तत्सत्यम् ।

इदं सर्वं प्रतीयमानं निखिलं जगत् ऐतदात्म्यम् एष एवात्मा यस्य स एतदात्मा । एतदात्मनो भाव ऐतदात्म्यम् । सर्वमिदं जगदेतेनात्मनात्मवदिति तात्पर्यम् । अत एव तत्सत्यम् । आत्मनः सत्यत्वादैतदात्म्यस्यापि सत्यत्वम् ।

स आत्मा तत्त्वमसि श्वेतकेतो इति ।

यत ऐतदात्म्यमिदं सर्वं तत् तस्माच्छ्वेतकेतो स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मा त्वमसीति। यत ऐतदात्म्यं ततः स एव त्वमसि। इति।

भूय एव भगवान्विज्ञापयतु इति।

पुनरपि भगवानेतत्तत्त्वं विज्ञापयतु बोधयत्विति श्वेतकेतुः प्रार्थयामासाचार्यम्।

तथा सोम्येति होवाच॥ ७॥

आचार्य उवाच तथा सोम्येति। विज्ञापयामि त्वां भूय इति॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठके अष्टमः खण्डः

अथ नवमः खण्डः

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति॥१॥ ते यथा तत्र न विवेकं लभन्तेमुष्याहं वृक्षस्य रसोस्म्यमुष्याहं वृक्षस्य रसोस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति।

हे सोम्य मधुकृतो मधुकर्यो मधुमक्षिका नानात्ययानां नानागतीनां वृक्षाणां रसान्समवहारं समवहृत्यैकतां मधुरूपतां रसं गमयन्ति॥१॥ यथा च ते रसास्तत्र विवेकं न लभन्तेहममुष्य वृक्षस्य रसोस्मीत्येवं खलु सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति स्वप्नदशावर्णनम्॥ २॥

त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति॥ ३॥

ते यद् यद् भवन्ति ये येभवंस्त एव तदा भवन्ति। स्वप्नावस्थायां कश्चिद् व्याघ्रो भवति कश्चित्सिंहः कश्चिद्वृक इति। पूर्वं व्याघ्रादयस्त आसन्नत एव स्वापदशायां तं तमात्मानं पश्यन्ति मानवाः॥ ३॥

स य एषोणिमा। ऐतदात्म्य०॥ ४॥

सर्वं पुनरुक्तमेव॥ ४॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठके नवमः खण्डः

अथ दशमः खण्डः

इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात् प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति। स समुद्र एव भवति। ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति॥ १॥

यथा सर्वा नद्यः समुद्रमेत्य समुद्रतामेव भजन्ते न तासां पृथक्सत्ता प्रतीयते गङ्गेयमहं सरयूः चाहमिति॥ १॥

एवमेव खलु सोम्येमाः सर्वाः प्रजा सत आगम्य न विदुः सत आगच्छामह इति। त इह०॥२॥ स य एषोणिमा०॥ ३॥

सर्वं पूर्ववद्व्याख्येयम्॥ ३॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठके दशमः खण्डः

अथैकादशः खण्डः

अस्य सोम्य महतो वृक्षस्य यो मूलेभ्याहन्याज्जीवन्स्रवेत्। यो मध्येभ्याहन्याज्जीवन्स्रवेत्। योग्रेभ्याहन्याज्जीवन्स्रवेत्। स एव जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति॥ १॥

स एष वृक्षो जीवेनात्मनानुप्रभूतोनुव्याप्तः पेपीयमानो मोदमानस्तिष्ठति। अत्र जीवेनात्मनेत्यस्य जीवात्मनेत्यर्थः॥ १॥

अस्य यदेकां शाखां जीवो जहात्यथ सा शुष्यति। द्वितीयां जहात्यथ सा शुष्यति। तृतीयां जहात्यथ सा शुष्यति। सर्वं जहाति सर्वः शुष्यति॥ २॥

वृक्षादिषु जीवोस्तीत्येकः पक्षः। नास्तीत्यपरः पक्षः। अस्तीति मत्वेयं श्रुतिः प्रवृत्ता। इयं श्रुतिर्न विश्वासार्हा। जीवोणुपरिमाण इत्येकं मतम्। विभुपरिमाण इत्यपरम्। जीवाणुत्वपक्षे तु सर्वथेयं श्रुतिरनुपपन्ना। जीवविभुत्वपक्षेप्यनुपपन्नैव। व्यापकं वस्तु कथं किं गृह्णीयात्किं च परिहरेत्॥ २॥

एवमेव खलु सोम्य विद्धीति होवाच जीवापेतं वावकिलेदं म्रियते न जीवो म्रियत इति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हे सोम्य एवमेव यद्यदङ्गं जीवो जहाति तदङ्गं म्रियते न जीवो म्रियत इत्यर्थः। जीवस्य नित्यत्वं साधयितुमेष प्रयत्नः।

एषोणिमैतदात्म्यम्०। भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच ॥ ३ ॥

स्पष्टम् ॥ ३ ॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठक एकादशः खण्डः

अथ द्वादशः खण्डः

न्यग्रोधफलमत आहरेति। इदं भगव इति। भिन्धीति। भिन्नं भगव इति। किमत्र पश्यसीति। अण्व्य इवेमा धाना भगव इति। आसामङ्गैकां भिन्धीति। भिन्ना भगव इति। किमत्र पश्यसीति। न किञ्चन भगव इति ॥ १ ॥

आचार्य आह श्वेतकेतो न्यग्रोधफलमेकमतोस्मान्न्यग्रोधवृक्षादाहरेति। इदमाहृतमित्याह श्वेतकेतुः। भिन्धीत्याहाचार्यः। भिन्नं भगव इदमित्याह श्वेतकेतुः। एवमग्रे विज्ञेयम्। सर्वं स्पष्टम् ॥१॥

तं होवाच। यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोणिम्न एव महान्न्यग्रोधस्तिष्ठति। श्रद्धत्स्व सोम्येति ॥ २ ॥

त शिष्यमुवाचाचार्यः। हे सोम्य यमेतमणिमानं न निभालयसे न पश्यसि, एतस्य सोम्यैष न्यग्रोधवृक्षः। अणिम्न एवातिसूक्ष्मस्य बीजस्यैवैतस्यैव एष महान्न्यग्रोधस्तिष्ठति। हे सोम्य श्रद्धत्स्वाश्रद्धां मात्र विषये निधेहि ॥२॥

स एषोणिमा। ऐतदात्म्यमिदं सर्वम्। तत्सत्यम्। स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान्विज्ञापयत्विति। तथा सोम्येति होवाच ॥३॥

सर्वं स्पष्टम् ॥३॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठके द्वादशः खण्डः

अथ त्रयोदशः खण्डः

लवणमेतदुदकेवधायाथ मा प्रातरुपसीदथा इति। स ह तथा चकार। तं होवाच। यद्दोषा लवणमुदकेवाधा अङ्ग तदाहरेति। तद्धावमृश्य न विवेद ॥ १ ॥

आचार्यः श्वेतकेतुमादिदेश—एतल्लवणमुदके जलेवधाय स्थापयित्वा प्रातर्मा मामुपसीदथा उपागच्छं। स श्वेतकेतुस्तथा चकार कृतवान्। पुनराचार्यस्तमुवाच—दोषा रात्रौ यल्लवणमुदकेवाधाः समस्थापयस्तदाहराङ्गेति। श्वेतकेतुस्तदवमृश्य तल्लवणमवमृश्य संशोध्य न विवेद नाजानादिति ॥१॥

यथा विलीनमेवाङ्गास्यान्तादाचामेति। कथमिति। लवणमिति। मध्यादाचामेति। कथमिति। लवणमिति। अन्तादाचामेति। कथमिति। लवणमिति। अभिप्रास्यैतदथ मोपसीदथा इति। तद्ध तथा चकार। तच्छश्वत्संवर्तते। तं होवाचात्र वाव किल सत्सोम्य न निभालयसे। अत्रैव किलेति ॥ २ ॥

तत्तथा चकार गुरूपदिष्टं पालयांचकार। कथयांचकार च तच्छश्वद् यथापूर्वं संवर्तते। तं शिष्यमुवाच। यथा यद्यपि विलीनमेवाङ्गलवणं तथाप्युदकस्यान्तादाचामेति। शिष्य आचामति स्म। पिता पृच्छति कथमिति कीदृशः स्वाद इति। लवणमित्याह शिष्यः। मध्यादाचामेतीत्याद्यपि व्याख्येयमेतयैव दिशा। जनक आह—अभिप्रास्य त्यक्त्वैतल्लवणजलं मा उपसीदथा मत्समीपमागच्छेति। शिष्यस्तथा चकार गुरोः समीपमागत्य तस्थौ। पितोपदिदेश तल्लवणं यन्मया रात्रौ जले क्षिप्तं तत्तथैव तत्र वर्तते। एवमत्र सर्वत्र वर्तमानमात्मानं त्वं न निभालयसे। तत्त्वत्रैव किलेति ॥२॥

स य एषोणिमैतदात्म्यमिदं सर्वं तत्सत्यम्। स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवन्विज्ञापयत्विति। तथा सोम्येति होवाच ॥ ३ ॥

सर्वं स्पष्टम् ॥३॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठके त्रयोदशः खण्डः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ चतुर्दशः खण्डः

यथा सोम्य पुरुषं गान्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्। स यथा तत्र प्राङ् वोदङ् वाधराङ् वा प्रत्यङ् वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥ १ ॥

पुनः पिता पुत्रमनुशास्ति–सोम्य यथा कंचन पुरुषमभिनद्धाक्षं वस्त्रबद्धचक्षुष्कं गन्धारेभ्य आनीयातिजने विजने देशे तं विसृजेत्। तत्र स प्राङ् प्राङ्मुख उदङ् उदङ्मुखोधराङ्धरमुखः प्रत्यङ् प्रत्यङ्मुखः प्रध्मायीत शब्दं कुर्यादहमभिनद्धाक्षो गन्धारेभ्य आनीतः कैश्चनाभिनद्धाक्ष एव वने निर्जने विसृष्ट इति ॥१॥

तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति। स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैवमेवेहाचार्यवान्पुरुषो वेद। तस्य तावदेव चिरं यावन्न विमोक्ष्ये। अथ सम्पत्स्य इति ॥२॥

यथा तस्याभिनहनं नेत्रबन्धनं प्रमुच्य दूरीकृत्य प्रब्रूयात्कश्चिद् एतां दिशमेतस्यां दिशि गन्धारा इत्येतां दिशं व्रजेति। स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसम्पद्येत प्राप्नुयात्। एवमेवेहाचार्यवान् सदाचार्यः पुरुषः सर्वाविद्याविमुक्तो वेदस्वरूपं ब्रह्मस्वरूपं चेति। तस्य स्वरूपविदो ब्रह्मविदो वा तावदेव चिरं तावानेव विलम्बो मोक्षावाप्तये यावन्न विमोक्ष्ये विमोक्ष्यते सः। अथ कर्मनिबन्धनं देहं कर्मफलभोगेन समाप्य देहपातानन्तरं सम्पत्स्ये सम्पत्स्यते स्वं रूपमिति ब्रह्मरूपमिति वा ॥ ॥

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यम्। स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान्विज्ञापयत्विति। तथा सोम्येति होवाच ॥ ३ ॥

एतत्पूर्वं व्याख्यातम् ॥३॥

इति छान्दग्योनिषदि षष्ठे प्रपाठके चतुर्दशः खण्डः

अथ पञ्चदशः खण्डः

पुरुषं सोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति। तस्य यावन्न वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥ १ ॥

उपतापिनं ज्वरार्तं मुमूर्षुं ज्ञातयः सम्बन्धिनः पर्युपासते मां जानासीति मां जानासीति पृच्छन्तः। स तावदेव सर्वाञ्जानाति यावत्प्राणवाङ्मनआदयः परस्यां देवतायां न सम्पद्यन्ते ॥१॥

अथ यदास्य वाङ्मनसि सम्पद्यते। मनः प्राणे। प्राणस्तेजसि। तेजः परस्यां देवतायामथ न जानाति ॥२॥

उपनिषदो मरणान्तरं पुनर्जन्माङ्गीकुर्वन्ति। अतस्तासां मते संसारिणां मरणक्रमो विदुषां च सत्सम्पत्तिक्रमः समान एव। विद्वान् परस्यां देवतायां सम्पद्य न जानाति जन्म च मृत्युं चेति ॥२॥

स य एषोऽणिमैतदात्म्यमिदं सर्वम्। तत्सत्यम्। स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान्विज्ञापयत्विति। तथा सोम्येति होवाच ॥ ३ ॥

सर्वं पूर्वं व्याख्यातम् ॥३॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठके पञ्चदशः खण्डः

अथ षोडशः खण्डः

पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्। परशुमस्मै तपतेति। स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते। सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति। स दह्यतेऽथ हन्यते ॥१॥

पिताब्रवीत्। सोम्य श्वेतकेतोऽयं पुरुषो हार्षीद्धनमन्यस्येति स्तेयमकार्षीदिति हस्तगृहीतं तं पुरुषमानयन्ति राजपुरुषाः। आदिशति चादेष्टास्मै चोराय परशुं तपतेति। अयं चोरपरीक्षणक्रमः। यदि कश्चिच्चौर्यं न स्वीकुर्वीत तं वह्निनातापयदित्याचारोऽद्यापि प्रवर्तते। तापभयेन यदि स स्तेयकर्ता स्यात् चौर्यं स्वीक-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रोति। ततश्चात्मानं तापान्मोचयति। यदि स चोर एव तप्तं परशुं गृहीत्वा दह्यते। हन्यते चापि ॥१॥

अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते। स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति। स न दह्यतेथ मुच्यते ॥ २ ॥

स्पष्टम् ॥२॥

स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वम्। तत्सत्यम्। स आत्मा तत्त्वमसि श्वेतकेतो इति। तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ३ ॥

स सत्याभिसन्धोचोरो यथा तत्र नादाह्येत न दह्येतैवं ब्रह्मविदुभयोः शरीरपातावसरे समानायामपि सत्सम्पत्तौ विद्वान् सत्सम्पद्य न पुनर्जायते व्याघ्रादियोनिषु। अब्रह्मविच्च क्रमेण बहुषु योनिषु सम्पतन्नुत्पतन्विविधानि दुःखानि सहमानः कृतानां कर्मणां फलमश्नुत इति। ऐतदात्म्यमिदं सर्वं सर्वं ब्रह्मशरीरमत एव तत्सत्यम्। स चात्मा श्वेतकेतो त्वमसि। अस्य पितुरुक्तं ह तद् विजज्ञाविति। सदेवाहमस्मीति ब्रह्मशरीरमस्मीति च स विज्ञातवान्। द्विरुक्तिरध्यायसमाप्तिबोधिका ॥३॥

इति छान्दोग्योपनिषदि षष्ठे प्रपाठके षोडशः खण्डः

●

षोडशः खण्डः

एष तु वा अतिवदति यः सत्येनातिवदति।

भगवान् सनत्कुमार आह—यः सत्येन वदति सत्यमाश्रित्य वदति एष वातिवदति। इत्थम्भूतलक्षणे तृतीया। अग्रे वक्ष्यति सत्यस्य माहात्म्यं "तस्य ह वा एतस्य ब्रह्मणो नाम सत्यम्" इति। सत्यं ज्ञानमनन्तं ब्रह्मेति तैत्तिरीया अप्युच्चारयन्ति।

सोहं भगवः सत्येनातिवदानीति।

नारद आह—भगवान् सोहं सत्येनातिवदानीति।

सत्यं त्वेव विजिज्ञासितव्यम्।

सनत्कुमार आह सत्यमेव विजिज्ञासितव्यमिति।

सत्यं भगवो विजिज्ञास इति ॥ १ ॥

नारदः प्रतिजानीते भगवन् सत्यं विजिज्ञास इति ॥१॥

इति छान्दोग्योपनिषदि सप्तमे प्रपाठके षोडशः खण्डः

●

अथ द्वाविंशः खण्डः

यदा वै सुखं लभतेथ करोति। नासुखं लब्ध्वा करोति। सुखमेव लब्ध्वा करोति। सुखं त्वेव विजिज्ञासितव्यम्। सुखं भगवो विजिज्ञास इति ॥ १ ॥

यदा येन सुखं लभते जीवोथ तत्करोति। असुखं लब्ध्वा न कोपि किञ्चित्करोति। अतः सुखमेव विजिज्ञासितव्यम्। सर्वे सुखमेवेच्छन्ति नासुखमिति सुखमेव विजिज्ञासितव्यमित्याह भगवान् सनत्कुमारः। नारदः प्रतिजानीते सुखमेव भगवन् विजिज्ञास इति ॥

इति छान्दोग्योपनिषदि सप्तमे प्रपाठके द्वाविंशः खण्डः

●

अथ त्रयोविंशः खण्डः

यो वै भूमा तत्सुखम्। नाल्पे सुखमस्ति। भूमैव सुखम्। भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति ॥ १ ॥

भूमशब्दोत्र बहुत्ववाचकः बहुशब्दादेव कृत इमनिचि "बहोर्लोपो भू च बहोः" प्रकृतिप्रत्यययोर्विकारे च सति भूमशब्दनिष्पत्तिः। बहुत्वमत्र वैपुल्यं न तु संख्याविशेषः। वैपुल्यमपि गुणोत्कर्षरूपम्। अत्राल्पशब्दतिप्रयोगितया निर्दिष्टो भूमशब्दस्ततो वैपुल्याश्रयधर्मिपर एव। व्याख्येया चेदानीं श्रुतिः। यो वै भूमा यद्विपुलं तदेव सुखम्। नाल्पे सुखमस्ति। नाल्पं सुखमितियावत्। अतो भूमैव विजिज्ञासितव्यः। नारदोङ्गीकरोति भूमानं भगवो विजिज्ञास इति ॥१॥

इति छान्दोग्योपनिषदि सप्तमें प्रपाठके त्रयोविंशः खण्डः

●

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ चतुर्विंशः खण्डः

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा । अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम् ।

यत्रानुभूयमाने वस्तुनि ततोन्यद् भूमत्वेन न पश्यति न शृणोति न विजानाति स भूमा । अथ यस्मिन्ननुभूयमानेन्येषामप्यवगतिर्भवति तस्याल्पत्वं विज्ञेयम् । न हि पूर्णता किंचिन् स्मारयति, अल्पतैव स्मारयति । अतो यस्मिन्ननुभूयमानेन्यस्य स्मरणं भवति तदल्पं भवतीति ।

यो वै भूमा तदमृतम् ।

यो वै भूमा तदेवामृतम् । ब्रह्मण्येव भूमत्वमतस्तस्मिन्नेवामृतत्वं जनिमृत्यादिशून्यत्वम् । यस्मिञ्ज्ञाते विजिज्ञासा शान्तिमेति स भूमेत्युक्त्वाप्यसन्तुष्टा श्रुतिः पुनराह यो वै भूमा तदमृतं केनापि सम्बन्धरहितम् । सम्बन्ध एवाल्पत्वं साधयति । अत एव यदल्पं तन्मर्त्यमित्याह । अल्पं यत्तत्तुच्छमितिभावः ॥

स भगवः कस्मिन्प्रतिष्ठित इति ।

शिष्यो नारदः पृच्छति भगवन् स भूमा कस्मिन् प्रतिष्ठित इति । कस्मिन्नित्यस्य कस्मिन्नाधार इत्यर्थः । सर्वमेव वस्तु यस्मिन् कस्मिन्नप्याधारे तिष्ठतीति लोकदर्शनम् । तदाश्रयीकृत्यायं प्रश्नः ।

स्वे महिम्नि ।

सनत्कुमार आह—स्वमाहात्म्येनैव तदवस्थानं न हि कस्मिंश्चिदाधार इति । आधारं लघीयानपेक्षते न महीयान् । अत एवाग्र आह—

यदि वा न महिम्नीति ॥ १ ॥

यदि सत्यं पृच्छसि तर्हि न महिम्नीति । तस्याधारो निषिद्धः । सर्वाधारस्य का नामान्वेषणाधारस्येति ॥१॥

किंच—

अन्यो ह्यन्यस्मिन्प्रतिष्ठित इति ॥ २ ॥

अन्योन्यस्मिन्नेव प्रतितिष्ठति न तु स्वं स्वस्मिन्निति ॥२॥

इति छान्दोग्योपनिषदि सप्तमे प्रपाठके चतुर्विशः खण्डः

अथ पञ्चविंशः खण्ड

भिन्नभिन्नपदार्थानां सर्वत्र सर्वेषां प्रतीतावपि ब्रह्मेतरपदार्थप्रतीतिर्नानुपपन्नेत्याह—

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदं सर्वमिति ।

भूमप्रकरणस्य प्रस्तुतत्वात्स इतिनिर्देशेन भूमैव ग्रहीतव्यः । स भूमैवाधस्तादुपरिष्टात्पश्चात्पुरस्ताद्दक्षिणत उत्तरतः सर्वत्र व्याप्त इति । न केवलं सर्वत्र व्याप्तः, स एवेदं सर्वम् । ततो भिन्नं किञ्चिदपीह नास्ति । एतदपि वचनं शरीरशरीर्यैक्यादेव संगतम् । अन्यथा स एवाधस्तात्स एवोपरिष्टादित्यादिभेदेन विधानं कथंचिदपि न घटते । यदि सर्वं तदेवेति तर्हि दिङ्निर्देशो नोपपद्यते । न च भेदेन प्रतीयमानं भ्रमजन्यमेवेति वाच्यम्, भ्रमाधिष्ठानस्यैव दुर्लभत्वात् । ब्रह्मातिरिक्तं यदि किमपि नास्ति तर्हि कस्य भ्रमः ? तस्यैव भ्रम इति कथनं तु कुतूहलावाहि । तस्यैव भ्रमोपि तस्यैवाभ्रमोपि सहैव संगच्छेत । मन्दोक्तिरेषा । न चानाद्यविद्यया संसृष्टं ब्रह्म ज्ञाज्ञाविति द्विधा इति नात्र वैचित्र्यमितिवाच्यम् । तर्हीदृशो ब्रह्मणः स्वीकारोपि न वैचित्र्याधायकः । यद्येकस्मिन्नेव वस्तुनि संयोगवशाद् ज्ञत्वाज्ञत्वयोरुभयोः स्वीकारे नाश्चर्यं तर्हि तस्मिन्नेव वस्तुनि नित्यत्वानित्यत्वस्वीकारोपि नाश्चर्याधायकः ।

अथातोहङ्कारादेशः ।

अतः परमहङ्कारदिशोहङ्ग्रहेण भूम्न उपासनप्रकार उपदिश्यते ।

अहमेवाधस्तादहमुपरिष्टावहं पश्चादहं पुरस्तादहं दक्षिणतोहमुत्तरतोहमेवेदं सर्वमिति ॥१॥

स्पष्टम् ॥ १ ॥

अथात आत्मादेशः ।

क्रियत इति शेषः । आदेश उपदेशः । अतः परमात्मोपदेशः क्रियत इति स्पष्टार्थः ।

आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्र किञ्चिद्विचारणीयम्। पूर्वं स एवाधस्तादित्युक्त्वा स एवेदं सर्वमित्युक्तम्। पश्चादहङ्कारादेशेनाहमेवेदं सर्वमित्युक्तम्। ततः परमात्मादेशेनात्मैवेदं सर्वमित्युक्तम्। अत्रास्य सर्वस्य त्रैविध्यमुक्तम्। तत्त्वेनोपदेशोहन्त्वेनोपदेश आत्मत्वेन च। अत्रोपनिषदोयमाशयः—सर्वत्रात्मदृष्टिः कर्तव्या। अहन्त्वे नर्निर्दिष्ट आत्मत्वेन वा निर्दिष्टः परत्वेन वा निर्दिष्टः शरीरशरीर्यंभेदेन समान एव। यदि शरीरशरीर्यभेदो नाङ्गीक्रियते तथापि न क्षतिः। आत्मध्यानेनापि कल्याणेनावश्यं भवितव्यम्। स्वरूपानुसन्धानमपि तदेव साधयति यत्पररूपानुसन्धानम्। अहं शुद्धोस्मीतिध्यायन्नवश्यमेव शुद्धिं लभते। उपनिषदां नास्ति कश्चिन्नियतः पन्थाः। क्वचिज्जीवेश्वरयोर्भेदः क्वचिच्चाभेदोपि नितरामुपदिश्यते। यत्र स्पष्टतो भेदो निर्दिष्टस्तत्राद्वैतवादिनस्तस्याशयं विवरीतुं प्रयत्नशीला यत्रचाभेदः स्पष्टतया निर्दिष्टस्तत्र विशिष्टाद्वैतवादिनः परमास्त्रं शरीरशरीर्यंभेदाभिधानं प्रयुञ्जते। कल्याणं कुतश्चिदन्यतो नोत्पद्यते। तत्तु स्वयमेव प्रयत्नेनोत्पादनीयम्। हृदयनैर्मल्यमेव तनुत्पादने ब्रह्मास्त्रमिति। अत एतच्छ्रुत्यनुसारेण तदस्मदात्मशब्दवाच्यं न किञ्चिद्विभिन्नं तत्त्वं वस्तुतस्त्वेकमेवेति स्पष्टतममुपदिश्यतेत्र। ततश्च सर्वभेदखेदनिर्वेदनिर्दलनं सम्पद्यते॥

स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः। स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति।

स वा एव आत्मा एवं पश्यन्नात्मातिरिक्तं किञ्चिन्नास्तीति पश्यन् एवं मन्वान एवं विजानन् आत्मरतिर्भवति आत्मन्येव रतिः प्रीतिर्यस्य तथा भवति। आत्मन्येव क्रीडा स्वच्छन्दविहारो यस्य तथा भवति। आत्ममिथुन आत्मसङ्गः। मिथृ मेथृ संगमे। उनन् प्रत्ययः। स च कित्। कित्त्वाद्गुणाभावः। आत्मनैव संगो यस्य स निस्संग इत्यर्थः। आत्मानन्द आत्मनैवानन्दो यस्य सः। किं च स एवं पश्यन् स्वराड् भवति स्वेन परानपेक्षित्वेन राजते तथाभूतो भवति। तस्य सर्वेषु लोकेषु ज्ञानेषु कामचारः स्वेच्छामनुसृत्य गमनशीलो भवति सर्वं जानातीत्यर्थः। लोकृदर्शने। दर्शनमहि ज्ञानम्। नात्र लोकशब्दो लौकिकलोकार्थः। नहि स्वरूपज्ञः कस्मिन्नपि प्रसिद्धे लोके चरितुमिच्छति। यदि तस्य तादृशीच्छा स्यान्न स्यात्स आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द इति। प्रलोभनमात्रमेतत्।

अथ येन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति। तेषां सर्वेषु लोकेष्वकामचारो भवति॥२॥

अथ येतोस्मादन्यथा वैपरीत्येन विदुस्तेन्यराजानो भवन्ति तेषां पारतन्त्र्यमवतिष्ठत एव। क्षय्यलोकाश्च भवन्ति। अत्रापि लोको ज्ञानमेव। तेनोपहताज्ञानास्ततो न भवन्ति कामचाराः। मुक्तात्मनामपि यत्र कुत्रापि जिगमिषा भवतीत्यौपनिषदो वादः। स च निरर्थक एव। न हि तत्त्वज्ञानसम्पन्नाः पुरुषा कल्पितान् स्वर्गादीन् गन्तुमभिलषेयुः।

इति सप्तमे प्रपाठके पञ्चविंशः खण्डः

अथ षड्विंशः खण्डः

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशात्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्तमात्मतः सङ्कल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतोमन्त्रा आत्मतः कर्माण्यात्मत एवेदं सर्वमिति॥१॥

यो ह्यात्मद्रष्टा भवति ब्रह्मरूपतां चाधिगच्छति तस्य प्राणाशास्मरादयो न भवन्तीत्याशयो वैपरीत्येन॥ १॥

तदेष श्लोकः

तदुपर्युक्तं वस्तु विवरीतुमेष श्लोकः।

न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्।
सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति।

पश्य आत्मद्रष्टा मृत्युं न पश्यति रोगं दुःखतां शोकं च न पश्यति। मृत्युं न पश्यतीत्यस्य जन्म न पश्यतीति परमार्थः। सति जन्मनि मृत्योरवकाशः। एवं चात्मदर्शी जन्ममरणबन्धनविमुक्तो भवतीति भावः। किं च स सर्वं पश्यति सर्वज्ञो भवतीत्यर्थः। सर्वशः स सर्वमाप्नोति सर्वथापहतकामो भवतीत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स एकधा भवति त्रिधा भवति पञ्चधा।
सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः।
शतं च दश चैकश्च सहस्राणि च विंशतिः।

ब्रह्मज्ञानाद्विदूरमवतिष्ठमानस्य स्थितिमुपस्थापयति। सः। स कः? योनात्मज्ञः। अनात्मज्ञो बह्वीषु योनिषु मानुषदेहे वा पुनः पुनरापततीत्यनया श्रुत्योक्तम्॥

तस्य कल्याणाय पन्थानं निर्दिशति—

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः।

आह्रियन्ते शब्दस्पर्शाद्या विषयायैस्ते आहारा इन्द्रियाणि। तेषां शुद्धौ तेषु विषयविचारविनिर्मुक्तेषु सत्स्वित्यर्थः। सत्त्वशुद्धिर्मनःशुद्धिर्भवति। सत्त्वशुद्धौ मनः शुद्धौ ध्रुवा निश्चला स्मृतिरात्मस्मृतिरित्यर्थः। भवति। स्मृतिलम्भे आत्मस्मृतिप्राप्तावात्मज्ञाने सतीत्यर्थः। सर्वग्रन्थीनां रागद्वेषादीनामविद्याहेतुकविषयाभिलाषाणां च विप्रमोक्षो भवति।

एतां भूतकथां श्रावयित्वा—

तस्मै मृदितकषायाय तमसः पारं दर्शयति— भगवान्सनत्कुमारः।

मृदितकषायायापगलितसर्वान्तिर्दोपाय तस्मै शिष्याय तमसः संसारात् पारं निःश्रेयसरूपं दर्शयति भगवान् सनत्कुमारः। यावन्न भवति कोपि मृदितकषायस्तावन्न स तमसः पारं प्राप्नोतीति भगवतः सनत्कुमारस्याशयः।

तं स्कन्द इत्याचक्षते तं स्कन्द इत्याचक्षते॥२॥

यस्तमसः पारं गच्छति मुक्तिमधिगच्छति तं स्कन्द इत्याचक्षते। स्कदिर् गतिशोषणयोः। यो जन्मपरम्परां शोषयति स स्कन्द इत्युच्यते। द्विरुक्तिरध्यायसमाप्तिसूचिका। २॥

इति छान्दोग्योपनिषदि सप्तमे प्रपाठके षड्विंशः खण्डः

अथ छान्दोग्योपनिषदि अष्टमे प्रपाठके

प्रथमः खण्डः

अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म। दहारोस्मिन्नन्तराकाशः। तस्मिन् यदन्तस्तदन्वेष्टव्यम्। तद्वाव विजिज्ञासितव्यमिति॥

नवीनेध्याये नवीना विद्या प्रारभ्यत इति प्रारम्भार्थकोथशब्द इह वेदितव्यः। दहरं सूक्ष्मम्। ब्रह्मपुरं शरीरम्। तस्मिन् शरीरे सूक्ष्मं पुण्डरीकं पुण्डरीकसदृशं वेश्म विद्यते। शरीरसहकारेणैव ब्रह्म प्राप्यत इति शरीरं ब्रह्मणः पुरम्। अस्मिन्दहरेल्पे वेश्मनि विद्यतेन्तराकाशः स चापि दहरः। तस्मिन्दहरे यदन्तर्मध्येवस्थितं यत्तत्त्वं तदन्वेष्टव्यम्। तद्वाव तदेव विजिज्ञासितव्यम्। हृदये परमात्मानं ध्यायन्ति योगिन इति पारम्परिकसदाचारमाश्रित्येयमुक्तिः। वस्तुतस्तु ध्यानस्थानं मूर्ध्नि विद्यते नान्तःकरणे। न वा हृदये। अत्यन्तं सूक्ष्मं यत्तत्त्वं ब्रह्माख्यं तदन्वेष्टव्यं तदेव विजिज्ञासितव्यमिति पिण्डितार्थः। यद्यन्तःकरणं न गृह्यते पुण्डरीकशब्देन तदा मस्तिष्कं ग्राह्यम्। तच्चापि पुण्डरीकसदृशम्। तत्रैव ब्रह्मणो ध्यानम्। तत्रैवान्तराकाशः। तत्रैव ब्रह्म सर्वथान्वेषणीयं चिन्तनीयं ध्यातव्यमिति। हृदयमेव ब्रह्मणः स्थानमिति वैदिका अपि मन्यन्ते। तथाहि अत्यतिष्ठद्दशाङ्गुलमिति ऋग्वेदे। अत्र दशांगुलशब्देन हृदयमेव गृह्यते। मस्तिष्कग्रहणेपि न क्षतिः। विशत्यत्रेति वेश्म। ब्रह्म हृदये विशदिवानुभूयतइति हृदयं मस्तिष्कं वा ब्रह्मणो वेश्मत्वेनोक्तम्॥ १॥

तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म। दहरोस्मिन्नन्तराकाशः। किं तदत्र विद्यते यदन्वेष्टव्यम्। यद्वाव विजिज्ञासितव्यमिति॥ १॥

पूर्वोक्तरीत्या दहर आकाशे यस्यान्वेष्टव्यत्वमुक्तं तत्किमस्ति विजिज्ञासितव्यस्य च किं स्वरूपमस्तीति-प्रश्नः॥ २॥

यावान्वा अयमाकाशस्तावानेषोन्तर्हृदय आकाशः। उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते। उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च सर्वं तदस्मिन्समाहितमिति॥३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्तरमाचार्यस्य। अयं बहिष्ठ आकाशो यावांस्तावानेव हृदयस्थ आकाशोपि। ननु कथमिदं भवितुमर्हति। बहिस्तु महानवकाशस्तेन तत्र बृहत्त्वं तस्य। हृदये मस्तिष्के वा तु न तथावकाशः कथं तर्ह्याकाशहृदयाकाशयोः स्थितस्य तुल्यत्वमिति। उच्यते अत्र यावत्तावतोरर्थो यथा तथेति। यथा बहिरेष आकाशः सर्वाधारस्तथैवान्तराकाशोपि। आकाशस्य व्यापकत्वाद्यथातथयोः संगतिर्भवितुमर्हति। यावत्तावच्छब्दयोर्यथाश्रुतार्थग्रहणे स्यादेव विप्रतिपत्तिः। महति प्रदेशे महान् विस्तार आकाशस्य। अल्पप्रदेशे चाल्पविस्तारः। एवं च यावानयं बहिर्दृश्यमान आकाशस्तावानवान्तराकाश इतिकथनं विरुद्धचेत। वस्तुतस्तु आकाशशब्देन न भौतिक आकाशो ग्रहीतव्यः। आसमन्तात्काशते दीप्यत इत्याकाशो ब्रह्म। ब्रह्मणो व्यापकत्वाद्यदेव ब्रह्म बहिस्तदेवान्तररिति। एवं च बहिष्ठमन्तस्थं च ब्रह्मैकमेव। एवं चास्मिन्नाकाशे ब्रह्मणि द्यावापृथिव्यावग्निश्च वायुश्च सूर्याचन्द्रमसौ विद्युन्नक्षत्राणि च सर्वमन्तरेव ब्रह्मान्तरेव ब्रह्मस्थमेवेति। यत्किमपि विद्यतेत्रास्य जीवस्य भोग्यं वस्तु यच्च नास्ति भोग्यमस्य तत्सर्वमस्मिन्नन्तराकाशे ब्रह्मणि समाहितमत्रस्थितमितिभावः। यावद्वस्तुजातं तत्तस्मिन्नेवावस्थितमित्यभिप्रायः॥ ३॥

तं चेद्ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः। यदैनज्जरा वाप्नोति प्रध्वंसते वा किं ततोति शिष्यत इति॥ ४॥

तमाचार्यं यदि शिष्या ब्रूयुः पृच्छेयुर्यदि ब्रह्मपुरेस्मिन् सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामास्तिष्ठेयुस्तदा यदा एनद्ब्रह्मपुरं जराप्नोति प्रध्वंसते नश्यति वा ततः किमतिशिष्यते इति। अत्र किंचिद्विवेचनीयम्। अत्रोक्तं ब्रह्मपुरे सर्वं समाहितमित्यादि। पूर्वमुक्तमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म। दहरोस्मिन्नन्तराकाशइति। अत्रोक्तं ब्रह्मपुरे सर्वं समाहितमिति। एवं च पूर्वापरविरोधः। विरोधपरिहारार्थमत्र ब्रह्मपुर इत्यस्य ब्रह्मपुरोपलक्षित अन्तराकाश इत्यर्थो ग्रहीतव्यः। यदा चैनद्ब्रह्मपुराख्यं शरीरं जरा वार्धकं वाप्नोति प्रध्वंसते वा यदैतत् तदा ततोन्यत्किमतिशिष्यत इति प्रश्नः॥ ४॥

स ब्रूयात्। नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते। एतत्सत्यं ब्रह्मपुरम्।

अस्य ब्रह्मपुरस्य शरीररूपस्य जरयैतद् ब्रह्म न जीर्यति, एवमस्य शरीरस्य वधेन तन्न हन्यते। कुतो न हन्यते? यत एतत्सत्यं नित्यं ब्रह्मपुरम्। ब्रह्मैव पुरं ब्रह्मपुरमित्यत्रार्थः। ब्रह्मरूपं यत्पुरं तत्तु सत्यं तत्र न जरा प्रवर्तते। न च तस्य हननं संभवति।

अस्मिन्कामाः समाहिताः। एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः सत्यसङ्कल्पः।

कामास्तु अस्मिन् ब्रह्मपुरे शरीरे शरीरोपलक्षितान्तःकरणे समाहिता भवन्ति न तु ब्रह्मरूपे परे। कथमेवमुच्यत इत्याह—एष आत्मापहतपाप्मापहतं पाप्म पुण्यापुण्यरूपं तत्फलस्वरूपसुखदुःखरूपं वा यस्य सोपहतपाप्मा। विजरो जरारहितः। विमृत्युर्मृत्युरहितः। विशोकः शोकरहितः। विजिघत्सो जिघत्सारहितः। अपिपासः पिपासारहितः। सत्यकामः सत्याः कामा यस्य तथाभूतः। सत्यसंकल्पः सत्या एव संकल्पा यस्य तथाभूतः। लिङ्गविपर्ययेणात्र निर्देशः॥

यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभि कामा भवन्ति। यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति॥ ५॥

यथेह लोके प्रजा यथानुशासनं राजशासनमनुल्लङ्घ्यान्वाविशन्ति अनुसरन्ति, यं यं चान्तं फलम्। यस्मै कस्मैचित्फलावाप्तय एव कर्माणि क्रियन्तेतः फलमेव कर्मणामन्त इत्युद्दिश्य फलार्थेन्तशब्दप्रयोगः। अभि उद्दिश्य कामा इच्छवो भवन्ति—नामतः परिगणयति—यं जनपदं कामयन्ते यं च क्षेत्रभागं कामयन्ते त तमेवोपजीवन्ति प्राप्नुवन्तीत्यर्थः॥ ५॥

तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते॥ ६॥

इह कर्मचितः कर्मभिः सम्पादितो लोको यथा क्षीयते पापपुण्यफलभोगादिनामुत्र परलोके पुण्यचितो लोकोपि क्षीयते पुण्यफलभोगेन। कर्म पुण्यरूपं वा स्यात्पापरूपं वा स्यात् फलावध्येव तज्जीवति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

फलान्ते च विनश्यति। अतः क्षयिष्णुभिः कर्मभिर्नि:श्रेयसाशा नाशंसितव्येति भावः ॥

इति प्रथमः खण्डः

●

अथ तृतीय खण्ड

तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः ॥ २ ॥

यथा कस्मिंश्चित् क्षेत्रे हिरण्यनिधिर्निहितो भवेत् परं तत्क्षेत्रमजानाना तस्मिन्नेव क्षेत्र उपर्युपरि संचरन्तोपि तं निधिं न प्राप्नुयुः। एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्यः एतं ब्रह्मलोकं न विन्दति। कुतो न विदन्ति तत्र कारणमाह–अनृतेन हि प्रत्यूढा इति। अनृतेन स्वरूपाविज्ञानेन लौकिकविषयनिषेवणेन वा प्रत्यूढा दूरमपनीता प्रतीपत्वं नीताः। एतत्सर्वं प्रकरणं स्वप्नविषयकमिति तु न विस्मर्तव्यम्। इह किमपि मोक्षोपयोगितत्त्वमौपनिषदं नास्तीत्यपि ध्येयमत्र। अतएव नात्र मया श्रमः सम्पादितः ॥ २ ॥

स वा एष आत्मा हृदि ॥ ३ ॥

स चैष आत्मा हृद्यवस्थित इति तत्रैव सोन्वेष्टव्य इति। इतःपरमत्रोपनिषद्भागाभावान्न व्याख्यातम्।

अथ य एष सम्प्रसादोस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते। एष आत्मेति होवाच। एतदमृतमभयमेतद् ब्रह्मेति ॥

सम्यक्प्रसादो यस्य स सम्प्रसादः। मृत्यूत्तरकाले जीवात्मा शरीरबन्धनाद्विमुक्तः सन् परं प्रसादमनुभवतीति संप्रसादशब्देन जीवात्माभिप्रेतः। सोस्माच्छरीरात्समुत्थाय निर्गत्य परं ज्योतिः परमात्मानमुपसम्पद्य प्राप्य स्वेन रूपेणाभिनिष्पद्यतेभिनिष्पन्नो भवति। सर्वदुःखविमुक्तिरेव स्वरूपाभिनिष्पत्तिः। एष एवात्म नान्यः कोपि। एतदेवामृतम्। एतदेवाभयम्। एतदेव ब्रह्मेति। सर्वकर्मविनिर्मुक्त आत्मा ब्रह्मरूपतां प्राप्नोतीति भावः ॥

तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥४॥

सर्वकर्मप्रहाणपूर्वकं य आत्मा ब्रह्मत्वं गतस्तस्यैव नाम सत्यमिति। सत्यमेव ब्रह्म ब्रह्मैव वा सत्यमिति वेदितव्यम्। सत्यमाहात्म्यमेतत् ॥ ४ ॥

इतोग्रेनुपनिषदिति न व्याख्यातम् ॥

इति छान्दोग्योपनिषद्यष्टमेध्याये तृतीयः खण्डः

●

अथ चतुर्थः खण्डः

अथ य आत्मा स सेतुर्विधृतिरेषा लोकानामसम्भेदाय।

अथ य आत्मा अतति गच्छति स एषां लोकानामसम्भेदाया मर्यादासंरक्षणाय रक्षणाय वा सेतुः। षिञ् बन्धने। सेतुमेव विवृणोति विधृतिरिति। विधृतिर्विशेषेण धारकः। विशिष्टा धृतिर्येनेति विग्रहः। आत्मशब्दो ब्रह्मवाचकः। सर्वेषां लोकानां विनाशो यथा न स्यात्तथा ब्रह्मैव धारकमिति। मर्यादां स्वीकृत्य संरक्ष्य च जीवाः कुशलिनस्तिष्ठन्ति स्थास्यन्ति चेत्युक्तम्।

नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतम्।

एतं सेतुं ब्रह्मरूपं न तरतोहोरात्रे नोल्लङ्घितुं शक्नुतः। नैतं जरा वार्धकं बाधते न मृत्युर्मारयति न शोकः शोचयति। तं न सुकृतं वर्धयति न दुष्कृतं लघयतीति। सर्वं तद्वश्यतां गतमिति।

सर्वे पाप्मानोतो निवर्तन्ते।

एतां परिस्थितिं प्रतिपन्नादत आत्मनः सर्वे पाप्मानो दोषा निवर्तन्ते। न हि कोपि दोषस्तमतिक्रमितुं शक्नोतीतिभावः।

अपहतपाप्मा ह्येष ब्रह्मलोकः ॥ १ ॥

ब्रह्म एव लोको ब्रह्मलोकः। स चापहतपाप्मा न हि तत्र किञ्चित्पापं वर्तते। अपहतपाप्मा सन्नयमात्मा ब्रह्मस्वरूपो भवतीति ॥ १ ॥

तस्माद्वा एतं सेतुं तीर्त्वान्धः सन्ननन्धो भवति, विद्धः सन्नविद्धो भवत्युपतापी सननुपतापी भवति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्माद्वा एतं सेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते। सकृद्विभातो ह्येवैष ब्रह्मलोकः ॥ २ ॥

तस्माद्ब्रह्मस्वरूपभवनादेतं सेतुं ब्रह्मरूपं तीर्त्वा प्राप्येत्यर्थः। अन्धः सन्नज्ञानी सन् ज्ञानी भवति। विद्धः सन् कामक्रोधद्वेषादिभिः शत्रुभिर्विद्धः सन्नविद्धो भवति। उपतापः रोगो दैहिकः। उपतापी सन् रोगी सन्नप्यरोगी भवति। तस्मात्कारणादेतं सेतुं तीर्त्वापि नक्तं रात्रिरहरेवाभिनिष्पद्यते। स्वप्रकाशस्वरूपो भवति सर्वं चाज्ञानरूपं तमो निवर्तते। ततः पर एष ब्रह्मलोक एतद्ब्रह्मेत्यर्थः। सकृत्तत्कालमित्यर्थः। विभातः प्रकाशितं भवति साक्षात्कृतं भवतीत्यर्थः ॥ २ ॥

तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानु विन्दन्ति तेषामेवैष ब्रह्मलोकः। तेषां सर्वेषु लोकेषु कामचारो भवति ॥ ३ ॥

तत् ये संयमिन एतं ब्रह्मलोकं ब्रह्मैतदित्यर्थः। ब्रह्मचर्येण ब्रह्मप्राप्तिसाधनेनानुविन्दन्ति प्राप्नुवन्ति तेषामेव ब्रह्मलोक एव। तेषां ब्रह्मस्वरूपता सिध्यत्येव। अतश्च तेषां सर्वेषु लोकेषु कामचारो भवति, स आत्मा ब्रह्मस्वरूपमेत्य सर्वव्यापको भवतीत्यर्थः ॥ ३ ॥

इति छान्दोग्योपनिषद्यष्टमे प्रपाठके चतुर्थः खण्डः

अथ पञ्चम खण्डः

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तत्। ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दते। अथ यदिष्टमित्याचक्षते तद्ब्रह्मचर्येण ह्येवेष्ट्वात्मानमनुविन्दते ॥ १ ॥

ब्रह्मचर्यं सकलेन्द्रियवशीकरणसाधनम्। विद्वांसो लौकिका यत् यं यज्ञ इत्याचक्षते तद्ब्रह्मचर्यमेव। यो ज्ञाता तत्त्वज्ञः स ब्रह्मचर्येणैव तमात्मानं विन्दते। अथ यदिष्टं यागविशेष इत्याचक्षते तद् ब्रह्मचर्येणैव साधनभूतेनेष्ट्वात्मानमनुविन्दते लभते ॥ १ ॥

अथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तत्। ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दते। अथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव। तद्ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते ॥ २ ॥

सन्त्रायणमित्यत्र सत्त्रायणमित्यपि पाठः। सन्त्रायणं सम्यक् त्रातेति यदाचक्षते तदपि ब्रह्मचर्यमेव। ब्रह्मचर्यं ब्रह्मचर्यव्रतधारिणं सम्यक् त्रायते। मौनमपि ब्रह्मचर्यमेव। ब्रह्मचर्यसाधनाङ्गत्वेन मौनस्यापि ब्रह्मचर्यत्वमुपचर्यते। तत् तस्माद् ब्रह्मचर्येणोपरिनिर्दिष्टेनात्मानमनुविद्य ज्ञाता मनुते ज्ञानवान् भवति। ज्ञानवत्त्स्य साधनं ब्रह्मचर्यमेव। ब्रह्मचर्यं चेहेन्द्रियसंत्राणं वागिन्द्रियनिग्रहश्च ॥ २ ॥

अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तत्। एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दते। अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत् ॥ ३ ॥

ब्रह्मचर्यमेवानाशकायनमित्याचक्षते विद्वांसः। न नाशकमनाशकम्। अनाशकमयनं स्थानमनाशकायनम्। ब्रह्मचर्यनिषेवणपूर्वकं ब्रह्मप्राप्तिसाधननिरतो यमात्मानमनुविन्दते स एष आत्मा न नश्यति। अवश्यं तस्यात्मसाक्षात्कारो भवति स्थिरश्च स तिष्ठतीति। अरण्यायनमरण्येयनं स्थानं यस्य तत्। अरण्ये निर्जने स्थाने निर्विकारे वा मनसि ब्रह्मसाक्षात्कारो भवतीति ब्रह्मचर्यसंरक्षणमप्यरण्ये निर्विघ्नं भवतीति आरण्यायनं ब्रह्मचर्यमेव।

अतः परमन्यत्परित्यक्तम्। न तत्रोपनिषत्त्वमिति ॥३॥

इति छान्दोग्योपनिषद्यष्टमे प्रपाठके पञ्चमः खण्डः

अथ सप्तमः खण्डः

य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः। सोऽन्वेष्टव्यः स विजिज्ञासितव्यः। स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥ १ ॥

य आत्मेत्यादि व्याख्यातं पूर्वम्। आत्मान्वेषणविजिज्ञासयोश्च फलमाह—स सर्वांल्लोकान् सर्वांश्च कामानाप्नोति। अत्यल्पमिदमुच्यते। आत्मान्वेषणतत्प्राप्त्यनन्तरञ्च न भवति किंचिदन्वेष्टव्यं न वा भवति विजिज्ञासितव्यम्। कः सर्वलोककामानवाप्नोतीत्याह—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्तमात्मानमनुविद्य गुरोः सकाशाल्लब्धविद्यः सन्विजानातीतिप्रजापतिरुवाच ॥ १ ॥

तद्धोभये देवासुरा अनुबुबुधिरे। ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति। इन्द्रो ह वै देवानामभिवव्राज विरोचनोऽसुराणाम्। तौ ह्यसंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥ २ ॥

उभये देवासुरा देवाश्चासुराश्च तदनुबुबुधिरे तत्प्रजापतिवचनम्। ते देवा असुराश्चोचुर्हन्त यमात्मानमन्विष्य सर्वांल्लोकान्कामांश्च सर्वानाप्नोति मुक्तात्मा तमात्मानमन्विच्छामः। ततो देवानां देवेष्विन्द्रोऽसुराणामसुरेषु च विरोचनोऽभिवव्राज प्रजापतिसकाशम्। असंविदानावेव जिज्ञासितमजानानावेव पाणौ समिधं गृहीत्वा प्रजापतिसान्निध्यमाजग्मतुः प्रापतुः ॥२॥

तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुः।

प्रजापतेराश्रमं गत्वा विज्ञातनियमौ तौ द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुश्चेरतुः॥

तौ ह प्रजापतिरुवाच किमिच्छन्ताववास्तामिति॥

प्रजापतिरुवाच पप्रच्छेत्यर्थः। ताविन्द्रविरोचनौ, किमिच्छन्तौ युवामवास्तामिति किं कामयमानौ युवामुषितवन्ताविति।

तौ होचतुर्य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स। सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह भगवतो वचो वेदयन्ते। तमिच्छन्ताववास्तमिति ॥ ३ ॥

तावूचतुर्यस्तमात्मानमनुविद्य विजानाति स सर्वांल्लोकान् सर्वांश्च कामानाप्नोति यस्तमात्मानमनुविद्य विजानातीति भगवतस्तत्रभवतो वचो वेदयन्ते विद्वांसः। तमेवेच्छन्ताववास्तमावामिति। अन्यद्व्याख्यातम् ॥३॥

तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यन्त एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति।

प्रजापतिस्तावुवाच। य एषोऽक्षिणी हृदये। अक्षिशब्दोऽत्र न नेत्रपरो हृदयपर एवेति। न ह्यात्माक्ष्णा द्रष्टुं शक्यः। किं चाक्षिणीत्येकवचनप्रयोगेणापि ज्ञायते नात्राक्षिशब्दो नेत्रपर इति। यदि तथेष्टं स्यादक्ष्णोरित्येव ब्रूयात्प्रजापतिराचार्यः। अश्नोते"रशेर्नित्" इति क्सिप्रत्ययेऽक्षीतिशब्दो निष्पद्यते। अश्नुते व्याप्नोति प्राप्नोतीत्यर्थः। अनेनेत्यक्षि हृदयम् हृदयेन विशुद्धब्रह्मदर्शनं भवति। एषः आत्मा शुद्धहृदये दृश्यमान एवामेति। स चात्मैव हृदयेनुभूयमान एवैतद्वेदप्रसिद्धममृतमभयं ब्रह्मेति।

इतः परमथ योयं भगवोऽप्स्वित्यादिर्ग्रन्थः सोऽनुपादेय इति कृत्वा न व्याख्यातः परित्यक्तश्च ॥ ४ ॥

इति छान्दोग्योपनिषद्यष्टमे प्रपाष्ठके सप्तमः खण्डः।

अथ द्वादशः खण्डः

मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना। तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम्। आत्तो वै सशरीरः प्रियाप्रियाभ्याम्। न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति। अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ॥ १ ॥

हे मघवन्निदं शरीरं वा निश्चयेन मर्त्यं मरणधर्मं। अत एव मृत्युनात्तं गृहीतं भवति। तच्छरीरमस्यामृतस्यामरणधर्मण आत्मनोधिष्ठानं कर्मं कर्तुं तत्फलं भोक्तुं च निवासस्थानम्। यावत्स सशरीरस्तिष्ठति तावत्प्रियाप्रियाभ्यामिदं प्रियमप्रियं चेदमिति प्रियाप्रियविचाराभ्यामात्तो गृहीतः प्रियाप्रियवस्तुभ्यां च। यावच्छरीरं तावदेव तस्यात्मनः प्रियाप्रिये भवतः। अपगतशरीरस्य न भवति किञ्चित्प्रियमप्रियं वा किञ्चित् ॥ १ ॥

स उत्तमः पुरुषः। स तत्र पर्येति ॥३॥

सह्युत्तम उत्कृष्टतमः पुरुषः शरीरस्थोपि। स तत्र परमात्मनि पर्येति परित एति एकीभवतीत्यर्थः। ३॥

इति छान्दोग्योपनिषदि अष्टमे प्रपाठके द्वादशः खण्डः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ त्रयोदशः खण्डः

अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति संभवामीति ॥ १ ॥

यत्राश्वो रोमाणि विधूय श्रान्तिमपनीय स्वस्थो भवति यथा वा चन्द्रो राहोर्मुखात्प्रमुच्य निर्मलो भवति निष्कलङ्को वा भवति तथैव कृतात्मा कृतकृत्य आत्मा शरीरं धूत्वा निर्बीजीकृत्याकृतं न कृतं कर्म यस्य सोनवशिष्टकर्मा सन्नित्यर्थः । अकृतमिति नपुंसकमौपनिषदम् । ब्रह्मलोकमभि संभवामि ब्रह्मलोकमुद्दिश्य संभवामि व्रजामीत्यर्थः । अश्वचन्द्रावुपमानभूतौ । तौ चात्यल्पौ । अश्वः पुनः पुनर्धूरिधूसरो भवति पुनः पुनश्च रोमाणि कम्पयित्वा धूरिमपनीय निर्मलो भवति । चन्द्रोपि पुनः पुना राहुमुखं पतति निस्सरति च । न तथात्मा । स च सकृदेवात्मानं बन्धनान्मोचयित्वा न पुनस्तत्रैव दुःखागारे मानवजन्मनि निपातयति । अत एव ब्रह्मलोकमभि संभवामीति द्विरुक्तिः । सा च न मन्त्रसमाप्तिसूचिका । न वा खण्डसमाप्तिसूचिका । सा तु नाश्वस्य धूलिविधूननमिव न वा चन्द्रस्य राहोर्विमुक्तिरिवात्मनः शरीरविमुक्तिः किन्तु शाश्वतिकी सेति सूचनार्थेति ॥ १ ॥

इति छान्दोग्योपनिषद्यष्टमे प्रपाठके त्रयोदशः खण्डः

●

अथ पञ्चदशः खण्डः

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः ।

अस्या उपनिषदोयमन्तिमः खण्डः । उपसंहरन्निमामस्य ब्रह्मविज्ञानस्यावतरणक्रममाह—तदेतद्विज्ञानं ब्रह्मा प्रजापतय उवाचोपदिदेश । स च मनवे । स च प्रजाभ्याः सर्वमनुष्येभ्यः । एवं क्रमेणागच्छदिदं विज्ञानमद्यापि मानवेषु पूर्वपरम्परातः प्रवर्तमानमस्ति ॥

आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः । स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते । न च पुनरावर्तते न च पुनरावर्तते ॥ १ ॥

जीवनस्यारम्भादन्तपर्यन्तस्य कृत्यं निर्दिशति । आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाचार्याय दक्षिणादि सम्पाद्य कुटुम्बे समावृत्य स्वकुटुम्बं प्राप्य दारान्स्वीकृत्य शुचौ देशे स्वाध्यायं गुरोरधीतमधीयानोधीतं वा मा गा विस्मृतिमिति पौनपुन्येन तदभ्यस्यन्, अथवा स्वाध्यायमधीयानोध्यापयन् । आर्षः प्रयोगः । लोकांश्च धार्मिकान्विदधत् सर्वेन्द्रियान्यात्मनि सम्प्रतिष्ठाप्य नियम्य सवभूतान्यहिंसन् संरक्षंस्तीर्थेभ्योन्यत्र । धार्मिकाणां कार्याणां गुरुनिर्दिष्टकार्याणां प्रजाकल्याणकार्याणां चापि तीर्थसंज्ञा । नित्यकर्मानुष्ठानं गमनागमकालेनिच्छयापि क्षुद्रप्राणिनां हिंसनं परोपकारादिकर्मसम्पादनार्थं यत्र तत्र प्रयाणमित्यादीनि कर्माण्यपि तीर्थशब्दवाच्यानि । अत्राज्ञातमपरिहार्यं च यत्प्राणिपीडनं भवति ततोन्यत्र सर्वं भूतान्यहिंसन्नितियोजना । स खल्वात्मा यावदायुषमेवं वर्तयन् वर्त्तमानो ब्रह्मलोकमभिसम्पद्यते । ब्रह्मलोकाभिसम्पत्तिर्नाम मुक्तिः । मुक्तः सन्नात्मा न पुनरावर्तते । संसारक्रमस्तत्र तिरोहितो निरुद्धश्च भवति । द्विरुक्तिरत्रोक्तार्थं द्रढयितुमेवेति ।

शान्तिपाठ

आप्यायन्तु ममाङ्गानि वाक्यप्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सवाणि ॥

अस्या उपनिषद आचार्यः स्वशिष्तान् शिक्षयितुं प्रार्थनाक्रममुपदिशति—ममोपासकस्य धर्मानाचरतो वाङ्गानि सर्वाण्याप्यायन्तु सन्तुष्टाणि नीरोगानि वृद्धानि च भवन्तु । वाक् प्राणश्चक्षुः श्रोत्रं बलं सर्वाणीन्द्रियाणि च चाप्यायन्त्विति ॥

इति छान्दोग्योपनिषद्यष्टमे प्रपाठके पञ्चदशः खण्डः

इति पण्डितराजस्वामिश्रीभगवदाचार्यमहाराजकृतं
छान्दोग्योपनिषत्संस्कारभाष्यं समाप्तम् ॥

●

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri